म ल्ह ण क वि प्र णी त म्

म ल्ह ण स्तो त्र म्

(स व्या ख्य म्)

सम्पादक :

श्री परड्डी मल्लिकार्जुनः

प्रकाशक :

श्रीजगद्गुरु-गङ्गाधरधर्मप्रचारक-मण्डलम्

मूरुसाविरमठः हुब्बल्ली ५८००२०

१९८२

ॐ

मान्यानां

"अर्वाचीन संस्कृतम्"

सम्पादकानां सविनयं

सादर-स्वीकारार्थं

विमर्शार्थं च

समर्पितमिदं स्तोत्र पुस्तकद्वयम्

— प्रकाशकः

SRI JAGADGURU GANGADHAR
DHARMA PRACHARAK MANDAL
MURUSAVIR MATH HUBLI

श्री जगद्गुरु - मूरुसाविरमठीय ग्रन्थमाला - १५३

मल्हणकविविरचितम्

मल्हणस्तोत्रम्

विश्वाराध्यकविविरचितया व्याख्यया

कन्नडाङ्ग्लानुवादटिप्पण्यादिभिश्च

समलङ्कृतम्

सम्पादकः

प्रा. परड्डी मल्लिकार्जुनः, एम्. ए. साहित्यरत्नम्

कर्नाटकविश्वविद्यानिलयसंस्कृतविभागः

धारवाड - ५८०००३

प्रकाशकः

श्रीजगद्गुरु-गङ्गाधरधर्मप्रचारक-मण्डलम्

मूरुसाविरमठः हुब्बल्ली-५८००२०

१९८२

Malhaṇakavikṛtaṁ **Malhaṇastotraṁ**
with Viśvārādhya's Sanskrit Commentary, edited with Kannada and English Translation and notes in Sanskrit

by

Prof: **Paraddi Mallikarjuṇ**
Department of Sanskrit
Karnatak University Dharwad-580003

Published by :

Śrī Jagadguru Gangādhara Dharma Pracāraka Mandalam, Moorusavira Math HUBLI-580020
Karnatak State (India.)

© Publisher

First Edition-January 1981

Copies 1000

Price : **Rupees Ten Only**

Printer :

Sadanand Pawar
Sadanand Printers, Old Dalal Market,
Dharwad-580001

विषयानुक्रमणिका

आशीर्वचनम्	i
प्रास्ताविकम्	iii
सख्याख्यं मल्हणस्तोत्रम्	१–३८
ಕನ್ನಡಾನುವಾದ	೧–೮
English Translation	1-9
टिप्पण्यः	१
अनुबन्धः	९
अकरादिश्लोकानुक्रमणिका	
शुद्धिपत्रम्	

—

परमपूज्यानां हुब्बल्ली – मूरुसाविरमठाध्यक्षाणां

श्रीमन्महाराज निरञ्जन–जगद्गुरुवर्याणां

श्रीगङ्गाधरराजयोगीन्द्रमहास्वामिनां

आशीर्वचनम्

भक्ताग्रेसरेण शिवमणेन मल्हणनाम्ना कविना यत् शिवस्तोत्रं रचितं, पुष्पदन्तविरचितमहिम्नःस्तवमिव यद्यपि भक्तिभावपूर्णं, तथापि तद्वत् अतीवजनप्रियं नास्तीति मनसि कृत्वा तत्प्रकाशनं कारितमस्माभिः श्रीमद्जगद्गुरुगङ्गाधरधर्मप्रचारकमण्डलद्वारा। रजतमहोत्सवसमारोहसन्दर्भे चत्वारिंशद्-ग्रन्थानां प्रकटनावसरे संस्कृतखण्डकाव्यामिदमतीवमोदावहं पठतां सहृदयानांमिति यदि भण्यते चेत् तन्नासंगतं भवेत्।

'हरिहरनाम्ना शिवकविना स्तुतोऽयं मल्हणः ख्रिस्ताब्धस्य द्वादशशतकात्पूर्वमेव काश्मीरदेशे जन्म लेभे' इति शक्यते कथितुम्। 'शिवप्रसादेनैव भुक्तिः, 'शिवप्रसादेनैव मुक्ति' इति नीतिः मल्हणचरितेन नितरां साधिता वर्तते। 'शतं जीवेम शरदाम्' इति वैदिकाशाभावं (optimism) अनुसृत्य मल्हणीविरहकातरोऽपि कविस्तदुपदेशानुसारं शिवालयं गत्वा यत्स्तोत्रं कृतवान् तत् शिवपञ्चस्तव्यामतीवमनोहरं भवति। यतोऽस्मिन् यया दृढतया भक्तिभावनाऽविष्कृता, साऽन्यत्र सुदुर्लभैव। मल्हणस्य न केवलं शिवभक्तिपारम्यं परन्तु वेदागमादिसमस्तसंस्कृतवाङ्मयस्य परिचयोऽपि रसिकानां नितरां रञ्जकः। द्रविडदेशीयत्रिषष्टिपुरातनशिवभक्तनामिवास्यापि भक्तिप्रभावो वीरशैवशरणानामाचारविचारयोः दरीदृश्यते। ग्रन्थस्यास्य सम्पादनं कुर्वन् श्री परड्डी मल्लिकार्जुनः न केवलमध्यापने किन्तु संस्कृतग्रन्थसम्पादने मौलिकग्रन्थरचनायां च समर्थं इति सगर्वमस्माभिः कथ्यते। कन्नडांग्लानुवादाभ्यां टिप्पणीभिः पाठान्तरैश्च समलङ्कृतमेतत् स्तोत्रं येन तेनैव कविजीवितं वसन्ततिलकवृत्तेन रचयित्वा काव्यप्रौढिमा दर्शितेति

स्ववंवेद्यम्। एवमेवास्य साहित्यसेवा चिरं प्रवर्ततां, तदर्थं च कर्ता श्रीजगद्गुरु गुरुसिध्देश्वरोऽजस्रमायुरारोग्यसमृध्दिना संयोजयत्वेनमिति आशास्महे। अन्ततः एतद्ग्रन्थप्रकाशनकार्ये येऽपि सहायमकुर्वन् तान् सर्वानपि श्रीजगद्गुरुः गुरुसिध्देश्वरोऽव्यादित्युक्त्वा विरामः।

इति शिवम्।

श्रीजगद्गुरु-गङ्गाधर - धर्मप्रचारकमण्डलीयं परञ्ज्योतिभवनम्
हुब्बल्ली – ५८००२०

———

किञ्चित्प्रास्ताविकम्

कर्णाटभाषया बध्दं हरीशेन महात्मना।
चरितं मल्हणस्येदं पठित्वा तुष्टिमागतः ॥ १ ॥

'कान्ता कचे'ति यत्तत्र लिखितं हरिहरेण तत्।
मल्हणस्तोत्रनिर्देशं करोत्येव न संशयः ॥ २ ॥

तद्हस्तप्रतिशोधार्थं धावतेतस्ततो मया।
लब्धाःकतिपया हस्त-प्रतयः पूर्णतां गताः ॥ ३ ॥

मल्हण (कृतशिव) स्तोत्रस्य हस्तप्रतिषु तासु

मुख्याः– A धारवाड नगरस्थकर्णाटक विश्वविद्यालयसबंध्द-कन्नडाध्यनसंस्थायाः ग्रन्थालये त्रयःप्रतयः–

1) K_1 – क्रमसंख्या – 614
2) K_2 – ,, 2534 (कर्णाटभाषाटीकायुता)
3) K_3 – ,, 2823

B हुब्बल्ली मूरुसाविरमठीय ग्रन्थालये M_1 M_2 सज्ञकं प्रतिद्वयम्।

C ख्रिस्ताब्धस्य 1943 तमे वर्षे सिकंदराबादनगरात् पंण्डित-चिदरेमठवीरभद्रशर्मणा प्रकाशिता शिवपंचस्तव्यामेकाऽ संज्ञका।

D मैसूरुविश्वविद्यानिलयस्य प्राच्यविद्यासंशोधनालयस्यः ग्रन्थागारे उपलब्धैका सटीका याऽधुना प्रकाश नीयते। (p 5090)

E मैसूरु–होसमठचरमूर्तिना श्रीबसवलिङ्गस्वामिना परिष्कृत-स्वरचितकर्नाटभाषाटिप्पर्णासहिते शिवपञ्चस्तवे प्रथमं स्तवम्। (1908)

श्रीमद्भिर्वरमूरुसाविरमठाध्यक्षैः सदोत्तेजितः
धन्यो 'मल्हण' भक्तपुङ्गवकृतं संपादयन् यत्स्तवम् ।
तत्प्राप्त्यादिकृतौ सहायमकरोद् यो वापि विद्वद्गणः
तेनाहं सुतरां भवाम्युपकृतो शर्वानुकम्पान्वितः ॥

कविजीवितम् ।

वृत्तं करोमि सुधियां मनसः सुखाय
वृत्तैर्वसन्ततिलकैः कविमल्हणस्य ।
उक्तं यथा हरिहराख्यकवीश्वरेण[1]
शम्भुप्रसादजनितान्निजभक्तिभावात् ॥ १ ॥

भक्त्या शिवे शिवगणप्रमुखा यथा सा
भक्तत्रिषष्टिरथ वै द्रविडागमोक्ता ।
काश्मीरदेशजनितैर्विविधैस्तथैव
भक्ताग्रणीपदमलंक्रियते हि शम्भोः ॥ २ ॥

काश्मीरदेशविनुते नगरे[2] कदाचिद्
राजाऽभवत् प्रवरसेनसुनामधेयः ।
भट्टः[3]सुवर्णबलतो नगराधिपस्य
मित्रं परं परमगौरवपात्रमासीत् ॥ ३ ॥

---

1 'मलुहणचरिते' नाम्नि कर्णाटभाषारचिते काव्यग्रन्थे ।
2 भारतीपीठनामभाजि ।
3 सुवर्णभट्टनामा ।

सौभाग्यतस्तदनु विप्रवरस्य तस्य
पुत्रो ह्यनङ्गमदृशो निजकायकान्त्या ।
जातःक्षितौ विमलधीरथ मल्हणाख्यः
यस्मिन् पिता प्रणयवान् ह्यभवत्सुधन्यः ॥ ४ ॥

विद्याविवेकबलवान् करुणाकरोऽसौ
सौन्दर्यवान् परमधार्मिक एव भूतः ।
प्रीत्या तया तु परया जनकेन तेन
चिन्ता कृता तनयसौख्यकृते प्रभूता ॥ ५ ॥

आयुःशताब्दियुतमित्यसकृद्विचार्य
कोटित्रयं समचिनोत्तु सषष्टिलक्षम् ।
येनात्मसूनुरिह वै स विमा श्रमेण
जीवेत् क्षितौ परमहर्षभरो धियेति ॥ ६ ॥

याते दिवं पितरि तद्वचनानुसारं
तस्यौर्ध्वदेहिकमनेन कृतं सश्रद्धम् ।
आसीत्कुटुम्बभरवान् युवकोऽपि तावत्
भक्त्या तया तु परया प्रमथाधिनाथे ॥ ७ ॥

तस्मिन् पुरे क्षितिलस्य ललामभूते
पद्मावतीति गणिता गणिकाऽवसद्या ।
तस्या अजायत सुता ननु मल्हणीति
कान्त्या तिरस्कृतरतिर्मदिनाभिरामा ॥ ८ ॥

भवतः शिवस्य तु शिवायतनं प्रविष्टः
आराधयन् प्रमथनाथमतीवश्रद्धः ।
पूजां विधाय गणिकातनयापि नृत्ये
गीतेऽनुरक्तमनसा सुचिरं हि तस्थौ ॥ ९ ॥

श्रीमद्भिर्वरमूरुसाविरमठाध्यक्षैः सदोत्तेजितः
धन्यो 'मल्हण' भक्तपुङ्गवकृतं संपादयन् यत्स्तवम् ।
तत्प्राप्त्यादिकृतौ सहायमकरोद् यो वापि विद्वद्गणः
तेनाहं सुतरां भवाम्युपकृतो शर्वानुकम्पान्वितः ॥

कविजीवितम् ।

वृत्तं करोमि सुधियां मनसः सुखाय
वृत्तैर्वसन्ततिलकैः कविमल्हणस्य ।
उक्तं यथा हरिहराख्यकवीश्वरेण[1]
शम्भुप्रसादजनितान्निजभक्तिभावात् ॥ १ ॥

भक्त्या शिवे शिवगणप्रमुखा यथा सा
भक्तत्रिषष्टिरथ वै द्रविडागमोक्ता ।
काश्मीरदेशजनितैर्विविधैस्तथैव
भक्ताग्रणीपदमलंक्रियते हि शम्भोः ॥ २ ॥

काश्मीरदेशविनुते नगरे[2] कदाचिद्
राजाऽभवत् प्रवरसेनसुनामधेयः ।
भट्टः[3]सुवर्णबलतो नगराधिपस्य
मित्रं परं परमगौरवपात्रमासीत् ॥ ३ ॥

---

1 'मल्हणचरिते' नाम्नि कर्णाटभाषारचिते काव्यग्रन्थे ।
2 भारतीपीठनामभाजि ।
3 सुवर्णभट्टनामा ।

सौभाग्यतस्तदनु विप्रवरस्य तस्य
पुत्रो ह्यनङ्गमदृशो निजकायकान्त्या ।
जातः क्षितौ विमलधीरथ मल्हणाख्यः
यस्मिन् पिता प्रणयवान् ह्यभवत्सुधन्यः ॥ ४ ॥

विद्याविवेकबलवान् करुणाकरोऽसौ
सौन्दर्यवान् परमधार्मिक एव भूतः ।
प्रीत्या तया तु परया जनकेन तेन
चिन्ता कृता तनयसौख्यकृते प्रभूता ॥ ५ ॥

आयुःशताब्दियुतमित्यसकृद्विचार्य
कोटित्रयं समचिनोत्तु सषष्टिलक्षम् ।
येनात्मसूनुरिह वै स विमा श्रमेण
जीवेत् क्षितौ परमहर्षभरो धियेति ॥ ६ ॥

याते दिवं पितरि तद्वचनानुसारं
तस्यौर्ध्वदेहिकमनेन कृतं सश्रद्धम् ।
आसीत्कुटुम्बभरवान् युवकोऽपि तावत्
भक्त्या तया तु परया प्रमथाधिनाथे ॥ ७ ॥

तस्मिन् पुरे क्षितिलस्य ललामभूते
पद्मावतीति गणिता गणिकाऽवसद्या ।
तस्या अजायत सुता ननु मल्हणीति
कान्त्या तिरस्कृतरतिर्मदिनाभिरामा ॥ ८ ॥

भवतः शिवस्य तु शिवायतनं प्रविष्टः
आराधयन् प्रमथनाथमतीवश्रद्धः ।
पूजां विधाय गणिकातनयापि नृत्ये
गीतेऽनुरक्तमनसा सुचिरं हि तस्थौ ॥ ९ ॥

तन्मल्हणीमसमरूपवतीं विलोक्य
तां पद्मिनीतनुभवां जितकामपत्नीम् ।
वेषादिभिर्द्विगुणितात्मशरीरकान्तिं
पंञ्चेषुघातितमनाः खलु मल्हणोऽभूत्[1] ॥ १० ॥

तं वीक्ष्य मन्मथशराहतदिव्यगात्रा
रूपकैलुब्धमनसा खलु विव्हलाङ्गी ।
कामारिमन्दिरवरे प्रणयाभिलाषौ
पद्मावती भवति वीक्ष्य मनःप्रसन्ना[2] ॥ ११ ॥

तस्यातुलं विभवराशिमथानुचिन्त्य
शीघ्रं तयोर्विरचितं शयनं महार्घम् ।
इष्टं सुखं मदनजं परिपूर्णरागौ
प्रावापतुः पुनरधीतकलाप्रपञ्चौ ॥ १२ ॥

तौ कामतोषमतुलं भवसौख्यसारं
वर्षाणि तत्र दश वेश्मनि वारनार्याः ।
स्वच्छन्दतोऽन्वभवतां शिवभक्तियुक्तौ
भोगोऽपि शर्वकृपयैहिक एव शक्यः ॥ १३ ॥

पद्मावती धनिकरक्तपिपासिताऽसीत्
तन्मल्हणोऽपि गतवैभव एव सद्यः ।
निष्कासितो बहिरतीवविषण्णभावः
द्रव्यैकतत्परतया हि तयातिमूढः ॥ १४ ॥

---

1 देवालयेषु प्रणयांङ्कुरतापि साध्या ।

2 विशिष्टाया विशिष्टेन सङ्गमो गुणवान्भवेत् । महाभारत सभापर्व 53-31

यत्सञ्चितं तनयसौख्यकृते हि पित्रा
द्रव्य त्रिकोटिमतुलं सहषष्टिलक्षम् ।
यूना तदर्पितमभूत् गणिकावशेन
कामान्धयौवनमदोत्कटमूढतैषा ॥ १५ ॥

द्रव्ये विनश्यति पुरोऽपि कृता न चिन्ता
नष्टं धनं, मकरकेतुमदोऽवशिष्टः ।[1]
तन्मल्हणीजपपरायणबुद्धिना तु
तत्र स्थितं बहिरतींवरुजा स्मरस्य ॥ १६ ॥

प्रालेयपातजनिता विषमार्तिरेषा
कामाग्निपूर्णमनसा परिगणते न ।
शीतं हिमं निजशरीरविषानलेन
बाष्पीभवत्प्रवहति प्रमदामदेन[2] ॥ १७ ॥

उत्थाय पश्यति यदा प्रमदा प्रभाते
प्रालेयसंवृतशरीरतयाऽतिगूढः ।
प्राणेश्वरीस्मरणविस्मृतसर्वपीडः
अश्मापि रोदानपरः क्रियते हि तेन ॥ १८ ॥

सा सान्त्वयन्त्यनुपमं हृदयाभिरामं
कामारिमन्दिरमथानयदात्मसोमम् ।
उक्तं तया 'कुरु शिवे दृढभक्तिभावं
तन्मल्हणीशतशतानि लभस्व देव ! ॥ १९ ॥

---

1 न जातु कामः कामानामुपभोगेन शाम्यति । हविषा कृष्णवर्त्मेव भूय एवाभिवर्धते ॥ (महाभारत आदिपर्व 75–50)

2 स्नेहमूलानि दुःखानि (महाभारत सभापर्व II 28)

तत्प्रेरितः शिवनुतिं कृतवान् गुणज्ञः[1]
वृत्तैर्वसन्ततिलकैः श्रवणाभिरामैः ।
प्रादुर्बभूव गिरिजारमणः प्रसन्नः
तं चाह 'वत्स वरणं कुरु वै वरस्य' ॥ २० ॥

जीवानया सह शतं शरदां सुखेन
कैलासमेहि च पुनः शिवमानसःसन् ।
तत्रापि ते हृदयवल्लभयैतयैव
गन्तव्यमित्युदितवान् भगवान् पुरारिः ॥ २१ ॥

तस्मिन् तिरोभवति पूर्णमनोरथौ तौ
स्वच्छन्दतो मकरकेतुसुखं ह्यनन्तम् ।
लब्ध्वा पुनः समयतः शिवलोकमेत्य
प्रावापतुः सुखमतीतवियोगदुःखम् ॥ २२ ॥

तेनैव पर्वतसुतारमणेन सद्यः
आरोपितो गणपदं कविमल्हणोऽयम् ।
सा मल्हणी विमलमानसरुद्रकन्या
अद्यापि तौ शिवसमीपनिवाससौख्यौ ॥ २३ ॥

वेश्यासुतापि सुगुणामलवृत्तिशीला
यावन्नरे भवति बद्धदृढानुरागा ।
तावत्सती भवति सा गृहिणीति नूनं
आविष्कृतं भवति मल्हणवृत्तपाठात् ॥ २४ ॥

---

1 अवलोकितव्यम्-अनेकजन्मार्जितपूर्वपुण्यात् कवित्वचिन्तामणिरेव लब्धा। स्वार्थं परार्थं परलोकसिद्धिं कीर्तिं प्रमोदं च कवेस्तनोति । (कवि-कर्णरसायने I-31)

वार्धक्य एव शिवसंस्मरणं हि कार्यं
उक्तं वृथा कतिपयैः कविभिः पुराणैः।
यूनाऽपि लौकिकसुखेऽपि कृतादरेण
कार्यं स्तवं गिरिसुतारमणस्य भक्त्या ॥ २५ ॥

——

व्याख्याकारपरिचयः

मल्हणपुष्पदन्तमलयराजदण्डिहलायुधनामभिः पुरातनशिवभक्तवर्यैर्विरचितानि क्रमशः मल्हणस्तोत्रं महिम्नःस्तोत्रं मलयराजस्तोत्रमनामयस्तोत्रं हलायुधस्तोत्रं चेति पञ्चशिवस्तोत्राणि पंञ्चस्तवीति प्रथितानि। यद्यपि मल्हणादीनां चरितानि संक्षेपतः तत्तत्स्तोत्रव्याख्यादिभाग एव व्याख्यात्रा कथितानि सन्तिः तथापि तज्जीवनकालादि नाख्यातम्। प्रायः सर्वेषां तेषां ऐतिह्यं संदेहास्पदमेव भासते। शिवपञ्चस्तव्याः विश्वाराध्यनाम्ना वीरमाहेश्वरेण 'अशेषरसिकहृदयाल्हादसंम्पादिनी' व्याख्या कृता।

व्याख्याकारेण तेन पीठिकायां 'श्रीमत्तटाकाब्जराजाध्यान्वयदुग्धसिन्धुविलसच्चन्द्रः' इत्यादि उल्लिखितमस्ति। अनेन विश्वाराध्योऽसौ गुरुस्थलमाहेश्वरपरम्परागतकेरेयपद्मरसवंशीय इति भासते।

कर्णाटकपद्मराजपुराणे कल्लकुरिके नामकराजधान्यां मल्लरस इति कश्चन माहेश्वरो राजाऽसीत्। तस्य तनूजो 'मादरसः' तस्य सुतो मायिदेवः, तत्पुत्रः केरेयपद्मरसः, तत्तनयः कुमारपद्मरसः, तस्य च सूनुः विश्वाराध्य इति वंशक्रमेण पद्मणाङ्ककविना निजवंशपम्परा निगदिता। तदनुसारेण विश्वाराध्यो मायिदेवप्रपौत्रः केरेयपद्मरसपौत्रः कुमारपद्मरसपुत्रश्चेति वक्तुं शक्यते। पद्मणाङ्ककविकृते कर्णाटकभाषाबद्धे पद्मराजपुराणे प्रथमसन्धिस्थेषु षट्पद्येषु (१६-२१) व्याख्यानकृतो वंशावलिः वर्णिता। विश्वाराध्यस्य पितामहस्य केरेयपद्मरसस्य राघवाङ्ककवेश्च

सम्बन्धोऽपि चिक्कनञ्जेशविरचिते राघवाङ्कचरिते नाम्नि कर्णाटक-भाषामयकाव्यग्रन्थे षोडशेऽध्याये द्रष्टव्योऽस्ति। राघवाङ्कादीनां गुरुः हरिहराख्यः शिवकविः ख्रिस्ताब्दस्य त्रयोदशशतमानेऽवर्तत इति कविजीवितकाराणामभिप्रायो वर्तते। अतएव अयं व्याख्याताविश्वाराध्यः पञ्चदशशतमानात्पूर्वमेव जीवितवानिति वक्तुं शक्यते।

शिवपञ्चस्तवीव्याख्यानावलोकनेन विश्वाराध्यस्यास्य वेदागमादिविद्यावैदुष्यं व्याकरणादिशास्त्रपरिचयश्च सुष्टु प्रकटीभवतः।

———

सव्याख्यं मल्हणस्तोत्रम्

कान्ताकचप्रचयपुष्पसुगन्धिगन्ध-
लुब्धभ्रमद्भ्रमरकर्बुरकन्धराय ।
गन्धर्वयक्षसुरसिद्धकिरीटकोटि-
सङ्घट्टघृष्टचरणायनमः शिवाय ॥ १ ॥

मल्हणस्तोत्रव्याख्या

यस्य भासा विभातीदमशेषं परमेशितुः ।
स्वतःप्रकाशं तं वन्दे भक्तपक्षमुमापतिम् ॥ १ ॥

भोगलं पटवद्भ्रातो यो लौकिकदृशां पुरा ।
शिवावधानिनं वन्दे मल्हणं तं गणेश्वरम् ॥ २ ॥

साक्षादीश्वरलोकगामिमहिमा श्रीमत्तटाकाब्जरा-
जाराध्यान्वयदुग्धसिन्धुविलसच्चन्द्रोवराकारवान् ।
सद्वृत्तः पदवाक्यतर्कभरतालङ्कारसङ्गीतवि-
द्विश्वाराध्यविभुः शिवागममुखव्याख्यानकृद्भासते ॥ ३ ॥

इत्यादि संस्तुतो लिङ्गणार्यमुख्यविचक्षणैः ।
शिवपञ्चस्तवानां तु व्याख्यानं न कृतं पुरा ॥ ४ ॥

व्याख्याहीत्यादराधिख्यादाख्यातोऽहं मनीषिभिः ।
तेषां व्याख्यामि तोषाय प्रख्यातं मल्हणस्तवम् ॥ ५ ॥

---

१ विरहस्तोत्रमिति प्रयोगः कविनाहरिहरेण कृतः स्वीये 'मल्लुहण चरिते' नाम्नि ग्रन्थे ।

§ कान्ताकचेति। कान्तायाः कामिन्याः कचप्रचये केशसमूहे धम्मिल्ले यानिपुष्पाणि मालतीनवमालिकामल्लिकादीनि तेषां सुगन्धोऽस्यास्तीति कान्ताकचप्रचयपुष्पसुगन्धी। अत्र इनिप्रत्ययः। अत एव गन्धेन मदेन लुब्धः कचप्रचयलोलुपः। 'गन्धोगन्धक आमोदेलेशेसम्बन्धगर्वयो'रिति विश्वः। अत एव भ्रमन् कान्ताकचप्रचयपुष्पसुगन्धिगन्धलुब्धभ्रमन्। स चासौ भ्रमरश्चेति विगृह्य हेतुहेतुमद्भावेन विशेषणसमासः। स इव कर्बुरा शबला। 'चित्रकिर्मीरकल्माषशबलैताश्चकर्बुर' इत्यमरः। तादृशी। धरतीतिधरा। पचाद्यच्। टाप्। कमिति, शिरोवाचकम्अव्ययम्। तस्य धरा कन्धरा ग्रीवा यस्य तस्मै। 'शिराधिः कन्धरेत्यपीत्यमरः'। व्यङ्ग्यार्थस्तु भ्रमरोऽपि कान्ताकचप्रचयपुष्पसुगन्धं प्रथममाघ्राय पश्चान्मोक्तुमनिच्छन् कान्ताकचप्रचये एव लुब्धः पुनर्भ्रमति। किमुततत्र कामबाणवशीकृतो मादृश इति। अथवा कान्तायाः मत्कान्तायाः कचप्रचयस्य सम्बन्धी यः पुष्पसुगन्धी। धृतपुष्पसुगन्धमिलितो गन्धः। तत्र लुब्धभ्रमद्भ्रमर इव कर्बुरा कन्धरा यस्य तस्मै। पद्मिनीजातिमत्कान्ताकचप्रचये प्रागेव स्वभावतो वर्तमानो गन्धविशेषो विचकिलादिकुसुमन्यासे सति तदीयसुगन्धमेलनात् अन्यादृशो भूत्वा भ्रमरस्याप्यत्यधिकमभिलाषमुत्पाद्य श्रमणबीजं भवतीति किमुवक्तव्यम् ममेति स्वाभिप्रायस्तुतिव्याजेन द्योतितः। इयं स्वाभिलाषानुकूला स्तुतिः। यद्वाशोभनो गन्धोऽस्येति सुगन्धिः। 'गन्धस्येदुत्पूतिसुसुरभिभ्य' इति सूत्रेणविहितः सुगन्धशब्दाद्बहुव्रीहिसमासादिकारप्रत्ययः। नत्विनिप्रत्ययः। गन्धस्येत्वे तदेकान्तग्रहणं कर्तव्यमिति वृत्तिकारः। सच सुगन्धिरत्र कचवासकः परिमलद्रव्यविशेषः। तथा चकान्तायाः प्रकृतवशात्पार्वत्याः कचप्रचये यानि पुष्पाणि तेषां सुगन्धेः कचवासकद्रव्यस्यच यो गन्धः परिमलस्तत्र लुब्धेन लोभेन। नपुंसके भावे क्तः। भ्रमन् अत्यर्थं वर्तमानः। रममाणः इति यावत्।

---

§ प्रथमश्लोकव्याख्यानात् पूर्वं मल्हणकथासङ्गतिः का व्याख्योरेण निरूपिता याऽनुबन्धेदृष्टव्या।

यद्वा पार्वतीकचप्रचयपुष्पाणां सुगन्धेः अङ्गसङ्गतसुगन्धिनामपरिमल-द्रव्यस्यच गन्धे लुब्धोऽभिलाषुकस्सन् भ्रमन्निति। कर्तरिक्तः। अथ सर्वेषां सुखप्रतीत्यर्थं सुगमं व्याख्यायते। कान्ताकचप्रचयपुष्पाणां सुगन्धिनो रजसो गन्ध इत्यादिशषं समानम्। पुरा किल तारकः तपसा ब्रह्माणमाराध्य ऊर्ध्वरेतस औरसः पुत्रो न सम्भवतीति शम्भोरौरस-पुत्रेतरावध्यत्व वव्रे। तदवगत्य दैत्यारिप्रमुखैर्देवैः प्रार्थितः परमेश्वरः पार्वत्याम् अत्यर्थं रेमे। इति पौराणिकीकथानुसन्धेया। एतेन पार्वत्यां परमेश्वरस्यानुकूलनायकता ध्वन्यते। यदाहुरालङ्कारिकाः। 'लालयन्न-लकप्रान्तान् सञ्चयन्केशमञ्जरीः। एनां विनोदयत्कान्तश्छायावदनु-वर्तत' इति। एव मत्कान्तायां मामपि कुर्विति चप्रतीयते। भ्रमर इव कर्बुरा कन्धरा यस्येति भ्रमरकर्बुरकन्धरः। कान्ताकचप्रचयपुष्पसु-गन्धिगन्धलुब्धभ्रमच्चासौ भ्रमरकर्बुरकन्धरच्चेति कृत्वा कर्मधारयः। ततश्चतुर्थी। पुरा किल परमेश्वरः क्षीरोदमन्थनोत्थं महाशेषनिष्ट्यूतं सुरासुरान् दहन्तं कालकूटं कण्ठे धृत्वा शुद्धस्फटिकसन्निभामपि स्वकन्धरां कर्बुरां चकारेति परार्धैकप्रवृत्तत्वं महादेवस्य द्योतते। गन्ध-र्वेत्यादि। गन्धर्वा दिव्यगायकाः हाहाहूहूप्रभृतयः। यक्षाः कुबेरादयः। सुराइन्द्रादयः। सिद्धा अष्टैश्वर्यभाजः। तदेतदुपलक्षणम्। इतरेषा-मपि विद्याधरकिन्नररक्षोगुह्यकादीनां तेषांकिरीटकोटीनां सङ्घट्टेन संस्पर्शेन। घृष्टौ सङ्घर्षितौ चरणौ यस्य तस्मै। अत्र किरीटकोटीना-मिति कोटिसंख्यायाः गुणभूतायाः स्वतश्चरणाभ्यां सह संस्पर्शसङ्ग-र्षणयोरन्वयायोगात् किरीटानामेवाहृत्य तद्वदन्वयः। तथा च नमस्कु-र्वतां गन्धर्वादीनामनेककोटिकिरीटानां सङ्घट्टेन घृष्टावित्यर्थो लभ्यते। यथा ब्राह्मणशतेन भुक्तमिति प्रयोगे शतब्राह्मणानां भोजनेनान्वयो न शतसंख्यया। शतसंख्यास्तु ब्राह्मणनिष्ठतया परम्परयैव। तद्वदत्रापि। यद्वा किरीटानां कोटिभि अश्रिभिः एकदेशैरित्यर्थः। 'स्त्रियः पाल्यश्रि-कोटयः' इत्यमरः। एवंभूताय शिवायनमः। निर्मलत्वात् निस्त्रै-गुण्ये पदे वर्तमानत्वापशेषकल्याणगुणकत्वादाशेरते सज्जनानां मनसी-तिवा। शिवङ्करत्वाद्वा शिव इत्याहुः। वाङ्मनःकायैराराध्यस्या-

धिकात्मत्वसम्पादनप्रभुत्वापरनामा नमः शब्दार्थ इति वेदभाष्यम्। तथा च त्रिभिरपि करणैः दास्यमुपगच्छामीत्यर्थः। आस्तोत्रसमाप्तेः वसन्ततिलकावृत्तम्। तल्लक्षणं तु वृत्तरत्नाकरे 'उक्ता वसन्ततिलका तभजाजगौग' इति। अन्त्यो वर्णो लघुरपि गुरुत्वेन व्यपदिश्यते ॥ १ ॥

न ब्रह्मविष्णुवचसामपि गोचरस्त्व-
मस्मद्विधस्य तदहो[1] किमवैमि[2] सर्वम्।
भक्तिस्तथापि शिव मां मुखरीकरोति
युष्मत्स्तुतौ कथय किं करवाणि = देव ॥ २ ॥

अथ स्तोत्रकरणे स्वस्यासामर्थ्यमाशङ्क्य भक्त्यैव स्तूयते नतु शक्त्येति परिहरति न ब्रह्मेति। भो शिव त्वं ब्रह्मविष्णुवचसामपि गोचरो विषयः न भवसि किल। अस्मद्विधस्य अस्मादृशस्य वचसां गोचरः किम्। नैवेत्यर्थः। अहो। गोचरो भविष्यतीत्येतदाश्चर्यमित्यर्थः। तत्सर्वम् अवैमि। जानामि। प्रधाने ह्यन्तर्गतस्याप्युपसर्जनस्य बुद्ध्यैव प्रतिभज्य प्रत्यवमर्शो दृष्टः। यथा राजपुरुषोऽयमित्यत्र कस्य राज्ञ इति प्रश्न इति न्यासकारवचनाद्वचसामित्यनुकर्षनः युज्यते। तर्हि किमर्थं स्तौषीत्यत आह भक्तिरिति। हेदेव! तथापि तव अस्मद्वचसामगोचरत्वेऽपि भक्तिः कत्रीपूज्यविषयेऽनुरागः। युष्मत्स्तुतौ। अत्र युष्मदिति पूज्यताव्यञ्जकः शब्दो न बहुत्वप्रतिपादकः। तेन शिवेत्येकवचनेनासङ्गतिर्नभवति। भवन्नुतौ मां मुखरीकरोति। मुखं वागस्तीति मुखरो वाचालः। मत्वर्थे रप्रकरणे 'खमुखनखकुञ्जेभ्योवक्तव्यमितिरप्रत्ययः। अमुखरं मुखरं करोति मुखरीकरोति। अभूततद्भावे च्विप्रत्ययः। अत्र अहं किं करवाणि किं कुर्यां। कथय। त्वमेव ब्रूहीत्यर्थः। भक्त्या तु शिवोविषयीक्रियत एव। तदुक्तमादित्यपुराणे मनुंप्रति भानुना।

---

1 किमहो M_1, M_2
2 तदवैमि M_1, M_2

"भक्त्यैवानन्यया राजन् ज्ञायते स महेश्वरः। न दानैर्न तपोभिर्वा, नाश्वमेधादिभिर्मखैरिति" ॥ २ ॥

ये त्वां मरीचिचयचामरचारुचन्द्र-
चूडामणे ! श्रुतिवचोभिरिहार्चयन्ति ।
मायाप्रपञ्चरचनानिचयं विलङ्घ्य
गच्छन्तिते शिवपुरं रुचिरैर्विमानैः ॥ ३ ॥

अथ वेदमन्त्रैरीश्वरमाराधयतां किं फलम् इत्यत्राह। ये त्वामिति। मरीचिचयेनकिरणगणेन चामरमिवचारुः शोभमानो मरीचिचय-चामरचारुः। यद्वा मरीचिचय एव चामरं मरीचिचयचामरमिति रूप-कसमासः। तेनचारुः चन्द्रएव चूडामणिश्शिरोरत्नम् यस्य सः तथोक्तः। तस्य सम्बुद्धिः। तथा च शिवस्य शिरोलङ्कारभूतश्चन्द्रः चामरवदपि भातीत्यहो चन्द्रस्य सौभाग्यंकस्यास्तीतिभावः। हे चन्द्रशेखर ! येत्वांम् इह लोके श्रुतिश्चोभिर्वेदमन्त्रैः अर्चयन्तिते। मायाया अविद्यायाः प्रपञ्चस्य कार्यवर्गस्य। रचनानां भुवनादीनां निचयं समूहं विलङ्घ्य। रुचिरैः मनोहरैः। विमानैः पुष्पकैः। शिवपुरं साम्बलोकं गच्छन्ति। यथा वायुः-

शतरुद्रं जपेद्यस्तु ध्यायमानो महेश्वरम् ।
सतेनैव शरीरेण रुद्रस्सञ्जायते ध्रुवम् ॥

जपेनानेन विप्रेन्द्राः नृपाश्चान्ये द्विजातयः ।
हित्वैव सकलंपापं गताः शिवपुरं पुरा ॥

अहं च परमेशस्य सामीप्यं लब्धवांस्तथा। इति। ननु शिवलोकस्यापि मायातत्त्वकार्यनिविष्टत्वात् कथं मायाप्रपञ्चोल्लङ्घनमितिचेन्मैवम्। शिवलोकस्थानां शिवगणानां तदवश्यत्वात्। यथाहुस्तान्त्रिकाः-"काल-योगेऽपि नोवश्याः कलानां पशुसङ्घवदिति"। यद्वा शिवपुरं शुद्धभुवनं वैन्दवलोकं गच्छन्ति। एवं पञ्चब्रह्मत्रियम्बकादिभिरर्चयन्तोऽपि ॥ ३ ॥

"उर्वीसमीरयजमानजलानलार्क-
सोमाम्बरादिभिरहोभवतस्तनूभिः ।
व्याप्तं समस्तभुवन समवेक्ष्य विद्वान्
कुर्यान्न कोऽत्र भगवस्त्वयि पक्षपातम्" ॥ ४ ॥

अथ परमेश्वरस्य मूर्त्यष्टकेन विना किमपि-कार्यं नास्तीत्यतः सर्वोपकारी शिव इति सर्वोऽपि प्रेक्षावान् उमापतिरेव मम दैवमिति पक्षपातं कुर्यादित्याह। उर्वीति। हे भगवन् समग्रैश्वर्य। वीर्ययशःश्रीज्ञानवैराग्यसम्पन्न। उर्वीसमीरयजमानजलानलार्कसोमाम्बरादिभिः। आदिशब्देन गुणत्वं मायातत्त्वं बिन्दुतत्त्वं च गृह्यते। त्रिभिः भवतस्तनूभिः साक्षादधिष्ठेयःवमात्रेण, मूर्तिभिः। नत्विन्द्रियाश्रयत्वेन भोगाश्रयत्वेनवा चिद्धने। भगवति कर्मासम्भवेन तथाविधतन्वयोगात्। तदेतन्निपुणतमुपपादितमस्माभिर्मलयराजस्तवविवरणे। पञ्चवक्त्रत्रिपञ्चनेत्रादिना मूर्तिपरिग्रहस्तु भक्तानुग्रहाय केवलं स्वशक्तिपरिकल्पितः। तदुक्तं श्रीमत्पौष्करे "साधकस्यतुलक्ष्यार्थं तस्य रूपमिदं स्मृतमिति। नत्वस्मदादिमूर्तिवन्मांसास्थिरुधिरादिधातुमयभौतिकत्वेन। तदुक्तं श्रीमद्वातुले="सवीर्यमपि निर्देहं मांसास्थिरुधिर न च। इन्द्रचापवदाकाशे दर्पणे प्रतिबिम्बवदिति। सोमाम्बरात्मभिरितिकेचित्पठन्ति। तत्र सोमाम्बररूपाभिरित्यर्थः। तव अष्टमूर्तिभिः अहो समस्तभुवनं व्याप्तमिति। समवेक्ष्य सम्यग्विज्ञाय। अत्र लोके कोविद्वान् त्वयि पक्षपातं न कुर्यात्। त्वमेव कर्ता भर्तापितापितामहः प्रेरकोऽनुग्रहको, गतिर्मतिर्दैवमिति। त्वय्यैव भक्तिं न कुर्यात्। सर्वोऽपि कुर्यादेव। तस्यातीथात्वात्। अथवा अत्रेत्येतत् त्वयीत्यस्यविशेषणम्। तदा अत्र अस्मिन्नष्टमूर्तौत्वयीत्यर्थः। तदेतदुक्तं लैङ्गे- "विनाकाशं जगन्नेह विनाक्ष्मां वायुनाविना। तेजसा वारिणा चैव यजमानेन भाविना॥ भानुना शशिना लोकस्तयैताः शिशवःप्रभो। तदस्यदेवदेवस्य मूर्त्यष्टकमयं जगदिति॥ ग्रन्थान्तरे "मूर्त्यष्टकमधिष्ठाय बिभर्तीदंञ्चराचरमिति। यस्त्वेव मम शिव एव दैवमिति त्वयि भक्तिं न कुर्यात्

सतु मूढ एवेति विद्वत्पदेन ध्वन्यते। तन्मूर्तितो जनित्वा तं व्यभिचरन्मूढः। पितृव्यभिचारी सुत इव विद्वद्भिः बहिष्कार्य एवेति भावः ॥ ४ ॥

"ब्रह्मेन्द्रविष्णुसुरदानवलोकपालै-
रन्यैश्चसिद्धमुनिभिः परिपूजितं[1] त्वाम् ।
दृष्ट्वा य[2]दत्रपुनरिच्छति दैव[3]मन्यत्
ससारिणो नरकहेतुरयं विमोहः" ॥ ५ ॥

अथ भवानीपतिं परित्यज्य अन्यदेवजुपाम्, अधोगतिरित्याह। ब्रह्मेन्द्रेति भो शिव। ब्रह्मेन्द्रविष्णुसुरदावलोकपालैः। यद्यपि सुरपदेन ब्रह्मेन्द्रष्णवोऽप्यभिधीयन्ते, तथापि गोवलीवर्दन्यायेन सुराणां मध्ये ब्रह्मेन्द्रविष्णूनां प्राधान्यात् पार्थक्येन निर्देशः। एवं लोकपालैरित्यत्रापि। यद्यपि ब्रह्मेन्द्रविष्णूनां लोकपालत्वमप्यस्ति, तथापि तद्व्यतिरिक्ततत्तल्लोकपालविशेषैरित्यर्थः। अन्यैश्च सिद्धमुनिभिः अष्टैश्वर्यमाभिर्मुनिभिः। अथवा सिद्धैर्मुनिभिश्च परिपूजितं त्वाम्। तदुक्तमेकपादपुराणे-

"वैष्णवे च तथा ब्राह्मे लोकपालाष्टकेतथा।
वैकृतेषु च लोकेषु विश्वदेवालयेषु च॥
विद्याधरेषु गन्धर्वे यक्षरक्षःपिशाचके।
गणे गरुडनाकेषु तथा वै किन्नरेषु च॥

पातालेष्वथस्वर्गेषु दानवेषु च सुन्दरि। आराधितो महादेवि लिङ्गमूर्तिर्महेश्वर इति, इत्थं सर्वत्र पूजितं भवन्तं, दृष्ट्वापि जनोऽयम् अत्र भुवि पुनरन्य देवमिच्छतीतियत् अयं विमोह। अमयामिति विधेयप्रा-

---

1 हरिपूजितं M_1, M_2, S
2 देव M_1, M_2 S
3 दृष्ट्वाऽपि यस्तु K_3

धान्येन पुल्लिङ्गनिर्देशः। तदुक्तं महाभाष्ये– "सर्वनामान्युद्देश्यविधेययोरैक्यमापादयन्ति पर्यायेण तत्तल्लिङ्गभाञ्जि भवन्तीति। इदमज्ञानम्। संसारिणो मलिनात्मनः। नरकहेतुर्दुर्गतिकारणम्। मदिष्यमाणो देवोऽपि महादेवमाराधयति किल! कियानह क्षुद्र इत्यवुध्वा महादेवं विहाय देवान्तरं यजतो मूढस्य दुर्गतिरेवेत्यर्थः। तथाञ्चाथर्वणी श्रुतिराह ईशानश्शिव एको ध्येयः सर्वमन्यत्परित्यज्येति। तदभिप्रायमाह पराशरः। सर्वमन्यत्परित्यज्य शिव एव शिवङ्करः ध्येय इत्याह परमा श्रुतिराथर्वणी खलु। 'विहाय साम्बमीशानं यजन्ते देवतान्तरम्। ते महाघोरसंसारे पतन्ति परिमोहिताः॥ विहाय साम्बमीशानं भजन्ते ये विमुक्तये। ते महातमसाक्रान्ता न तेषां परमा गतिरिति॥ "ज्ञानयोगखण्डे अस्मिन्अर्थे श्रुतिः, "साध्वी समाप्ता वेदवित्तम" इत्यलमति विस्तरेण ॥ ५ ॥

"त्वं पासि हंसि विदधासि तिरस्करोषि
मुक्तिं परां नयसि नित्यमशेषलोकान्।
सर्वप्रदोसि शिवसर्वकरस्त्वमेवं
मत्वा विकल्पमिति जन्तुरलेपकः स्यात् ॥ ६ ॥

अथ परशिवप्रणीतसिद्धान्तशास्त्रप्रतिपादितपरमेश्वरपञ्चकृत्यप्रशंसनमुखेन स्तौति त्वमिति। हे शिव त्वं नित्यं। अशेषलोकान् लोकशब्देन भुवनानि जीवाश्चाभिधीयन्ते। 'लोकस्तु भुवने जने' इत्यभिधानात्। तत्र सृष्टिस्थितिसंहरास्तदुभयविषयाः। तिरोभावमोक्षेतु चैतन्यैकविषये इति ध्येयम्। पासि रक्षसि। स्वस्वविषये स्थापयसि। अनेनस्थितिरुक्ता। हंसि साक्षात्परम्परया च जगद्योनावुपसंहरसि। अनेन प्रलय उक्तः। विदधासि उपादानात्कार्यमाभावयसि। शरीरेन्द्रियादिकं च विदधासि। अनेन सृष्टिरुक्ता। संहारानन्तरं सृष्टिकथनेन सर्गप्रलयप्रवाहाविच्छेदस्सूचितः। तिरस्करोषि भोगाद्याच्छानलक्षणं तिरोभावं करोषि। अनेन तिरोभावरूपो व्यापार उक्तः। परां शास्त्रान्त–

रोक्तमुक्तिभ्य उत्कृष्टाम् । यद्वा पञ्चपाशच्छेदात् उत्कृष्टाम् । षट्-त्रिंशत्तत्वातीतां मुक्तिं । परशिवसाम्यलक्षणां नयसि साधारनिराधारा-मुग्रहाख्यां प्रपयसि । अत्र नयतेः द्विकर्मकत्वम् । अनेनानुग्रह उक्तः । परामिति विशेषणमहिम्नोऽन्याप्यपरामुक्तिस्सूचिता । नित्यमिति पदेन महाप्रलयेऽपि परमेश्वरस्य प्रकारान्तरेण पञ्चकृत्यकारित्व-मस्तीति सूचितम् । तदुक्तं श्रीमन्मृगेन्द्रे- "स्वापेप्यास्ते बोधयन् बोधयोग्यान् रोध्यान् रुन्धन् पाचयन् कर्मिकर्म । मायाशक्तिर्व्यक्ति-योग्याः प्रकुर्वन्, पश्यन् सर्वं यद्यथा वस्तुजातमिति" एवमुक्तप्रकारे जन्तुर्जनः । गुरुतश्शास्त्रतश्च सम्यग्ज्ञात्वा । अलेपको निर्लेपकः । सकलबन्धशून्यः स्यात् । आत्यन्तिकपाशविमुक्तिशिवत्वाभिव्यक्त्यर्थं सिद्धान्तशास्त्रमेव सद्भिस्सेव्यम् । सर्वज्ञपरिप्रणीतत्वात् । शास्त्रान्त-राणां तु सर्वेषां किञ्चिज्ज्ञानप्रणीतत्वेन पुनरावृत्तिहेतुत्वादिति भावः ॥ ६ ॥

"शाठ्येन येऽपि भगवन्तमनन्तशक्तिं
शम्भो भवन्तमभवं भविनो नमन्ति ।
तेऽप्यन्धकारमतिघोरकृतान्तदन्त-
यन्त्रान्तरालगहनं न पुनर्विशन्ति" ॥ ७ ॥

येन केनापि कृतस्य शिवनमस्कारस्य माहात्म्यमाह । शाठ्येनेति । शम् अस्माद्भवतीति शम्भुः । शं सुखं मप्रेर्यतारूपं भावयतीति वा शम्भुः । तस्या-मन्त्रणं । हे शम्भो । "न विद्यतेऽन्तोऽवधिर्देशतःकालतो वा यस्यास्सा अनन्ता । तादृशी शक्तिर्यस्यः अनन्तशक्तिस्तम् । अभवं, न विद्यते भवो जन्म यस्य तमभवम् । भगवन्त निरतिशयषड्गुणैश्वर्यसम्पन्नं भवन्तम् । ये भविनो जन्मिनः । शाठ्येन शठत्वेनापि, नमन्ति । तेऽपि । अन्धं करातीत्यन्धकारम् । §यद्वा । अतिघोरकृतान्तदन्तयन्त्रान्तराले ।

---

§ अतिघोरस्य अतिभयङ्करस्य कृतान्तस्य यमस्य दन्ता एव यन्त्रं, निष्पी-डनसाधनं द्रव्यं, तस्य अन्तरालमेव गहनं, गह्वरं काननं तत् । पुनः न विशन्ति ।

यद्गहनं दुःखं तत्पुनर्न विशन्ति । नानुभवन्तीति यावत् । 'गहनं गह्वरे दुःखे विपिने कललेपि चेति विश्वः। प्राणिनं कृतान्तदन्तान्तरालप्रवेशस्य पापहेतुकत्वात् तत्पापं भवन्नमस्कारः परिहरति । तदा कुतःतद्दन्तमध्यप्रवेशः। कारणाभावे कार्याभावादिति भावः। यदाहुः पौराणिकाः। अनादरेण शाठ्येन परिहासेन मायया । नमस्कारे कृते लिङ्गं सर्वपापहरो हर इति ॥ ७ ॥

"कस्यापरस्य मकराहतघोरनक्र-
चक्रक्रमात्कमललोलजला च गङ्गा ।
खण्डेन्दुकोटिकरकोरकभारभाजि
बभ्राम बभ्रुणि जटापटले विमूढा" ॥ ८ ॥

अथ गङ्गाधारणमाह कस्येति । हे शिव मकरैः मत्स्यैर्नक्रैर्वा । आहतानां प्रतिहतानां घोराणां भयङ्कराणां नक्राणां प्रतिनक्राणां प्रत्यर्थिकुम्भीराणां चक्रक्रमात् चक्राकारेण आक्रमणात् कमलेषु लोलं जलं यस्याः सा, तथोक्ता । अथवा नक्राणां चक्रस्य चयस्य क्रमात्पादविक्षेपात्, कमलेषु लोलजला । यद्वा कमलवद्वातोद्धूतपद्मवत् लोलं चञ्चलं जलं यस्याः सा तथोक्ता गङ्गा च । चशब्दस्त्वर्थः। मन्दाकिनी तु। अपरस्य त्वदन्यस्य कस्य देवस्य। खण्डेन्दुकोटिकरकोरकभारभाजि। खण्डेन्दोः बालचन्द्रस्य कोटेः अग्रेः। करा मयूखा एव कोरकाः। तेषां भार समूहं भजतीति तथोक्ते। बभ्रुणि कनकपिङ्गले। जटापटले। जटासमूहे। विमूढा निर्गमद्वारमपश्यन्ती सती। बभ्राम भ्रमणं कृतवती। न कस्यापीत्यर्थः। अनेन देवतान्तरेभ्यो भगवत उत्कर्षः सूचितः। पुरा किल मन्दाकिनी वृन्दारकेन्द्रैरावणवप्रक्रीडानिर्भिन्नतीरा क्षुभिता च सती कुपिता भूत्वोल्लसितकल्लोलमाला फेनिला ब्रह्माण्डपिण्डकबलीकरणोद्यतेव स्थिता। तां वीक्ष्य विष्णुविरिञ्चिवासवादयः सर्वे भयविह्वलाः शङ्करं शरणं ययुः। शिवस्तु तद्रक्षायैतादृशीं गङ्गां निजमौलौ बिन्दुवद्बभारेति पौराणिकी कथा ॥ ८ ॥

"प्रोत्तुङ्गपीवरघनस्तनहारभार-
विद्याधरीभुजलतायुगपाशबद्धाः ।
ते पर्यटन्ति भगवन् गगने विमानै-
र्यैरर्चितो हर नरैरुमया सह त्वम्" ॥ ९ ॥

अथोमया सह महेश्वरार्चनस्य फलमाह प्रोत्तुङ्गेति । हे भगवन् । हर ! हरत्यन्तकाले सर्वमिति हरः । अथवा हरति पशुभ्यः पाशान् पुंसोऽप्यूर्ध्वं निराहुः । उमया सह त्वम् । यैर्नरैरर्चितः । ते नराः । प्रोत्तुङ्गपीवरघनस्तनहारभारविद्याधरीभुजलतायुगपाशबद्धाः । प्रोत्तुङ्गयोरत्युन्नतयोः । पीवरयोस्स्थूलयोः । घनयोःकर्कशयोस्स्तनयोः हारा एव भारो यासां तासां विद्याधरीणां । भुजौ लते इव भुजलते । तयोर्युगमेव पाशस्तेन बद्धाः । गाढालिङ्गितास्सन्त इत्यर्थः । विमानैः पुष्पकैः । गगने । पर्यटन्ति चरन्ति । उमासहितशङ्करार्चनस्य भोगहेतुत्वादिति-भावः । तदुक्तं स्कान्दे ईशानसंहितायां ब्रह्मविष्णुमोहशमनार्थं महालिङ्गप्रादुर्भावे, तदाद्यन्तदर्शनासक्तयोः स्तुवतोर्विष्णुब्रह्मणोरीश्वर-प्रसक्तिकाले-

यश्चान्योऽपि यजेद्रूपमेतद्भक्त्या ममानिशम् ।
साम्बिकं त्र्यम्बकं साम्य तस्मान्नान्योऽस्ति मे प्रियः ॥
तस्येहाप्यखिलान् भोगान् क्षिप्रं दास्यामि दुर्लभान् ।
सगणं तं प्रणेष्यामि मत्समीपं मृतं नरम् ॥

युवां चार्चयतं भक्त्या लिङ्गं कृत्वा सुनिर्मलमिति । मूर्तिध्यानेऽप्युक्तम्-वामे मरकतश्यामा दक्षिणे विद्रुमारुणा । देवतादम्पतिमयी सा मे कामधुघा भवेदिति ॥ ९ ॥

"भेरीमृदङ्गसुरदुन्दुभिशङ्खनादै-
र्देवाङ्गनाकलकलाकुलदिङ्मुखेषु ।
क्रीडन्ति दिव्यभवनेषु सहाप्सरोभि-
र्भक्त्या कृतं तव पुरो मुखवादन यैः" ॥ १० ॥

अथ लिङ्गस्य पुरतः कृतस्य मुखवाद्यवादनस्य फलमाह। भेरीति। हे शिव तव पुरः पुरतः। यैर्नरैः मुखवादनं वेणुमुखवीणादिमुखवाद्यवादनं। भक्त्या कृतम्। उत्तरवाक्यगतो यच्छब्दस्तच्छब्दोपादानमपेक्षते। अतस्ते इति लभ्यते। भेर्यः प्रसिद्धाः मृदङ्गाः। मुरजाः। सुरदुन्दुभय. देवताभेर्यः। शङ्खाश्च। भेरीमृदङ्गसुरदुन्दुभिशङ्खम्। तस्य नादैस्सार्धं। देवाङ्गनानां। कलकलैःकोलाहलैः। आकुलानि व्याप्तानि दिशांमुखानि दिङ्मुखानि येषां तेषु। दिवि भवानि दिव्यानि। तेषु भवनेषु। अगारेषु। अप्सरोभिः ऊर्वश्यादिभिस्स्वर्वेश्याभिस्सह। क्रीडन्ति रमन्ते। यदुक्तम्-

अर्चयित्वा तु योलिङ्गं मुखवाद्यं तु कारयेत्।
पूज्यते गणकोटीभिः देवदेवस्य सोऽग्रतः॥

पूजाकाले त्रिसन्ध्यं वा यःकुर्याद्गेयवादनम्।
नृत्यं वा मुखवाद्यं वा सोऽपीश्वरपदंलभदिति॥

ईश्वरपदभाजो गणकोऽपि पूज्यस्य। अप्सरोभिस्सहक्रीडनमनुक्तिसुलभमिति ज्ञेयम्। किंबहुना? हिमवत्यचले सिद्धचारणसेविते ज्योतिष्काख्ये शिखरे मतङ्गमुनीश्वरस्तप उग्रं समास्थाय शिवध्यानसमाहितमनाः सुचिरं बभूव। स कदाचित् स्वकीयमनसि लक्ष्यच्युते सति, विषण्णस्समाधिं हित्वोत्थाय वेणुमादायच्छिद्रैरलङ्कृतं तं कृत्वा चित्तचाञ्चल्यस्य विच्छित्तये महतो मोहस्य हतये सम्यग्ज्ञानावाप्तये च शिवलिङ्गसन्निधौ वादितवान्। ततः प्रसन्नो भवानीपतिः तस्यै सर्वसमीहितं दत्त्वा मतङ्गपारमेश्वरमपि श्रावयामासेति तदुपोद्घाटपटले पठ्यते। अथवा भक्त्या यैस्तव पुरो मुखवादनं कृतं ते, देवाङ्गनाकलकलाकुलदिङ्मुखेषु दिव्यभवनेष्वप्सरोभिस्सह। भेरीमृदङ्गसुरदुन्दुभिशङ्खनादैः क्रीडन्तीत्यन्वयः। केचित्तु मुखवादनंयमिति पठन्ति। तव यत्तत्पदाध्याहारःकर्तव्यः। तथा च भेरीमृदङ्गसुरदुन्दुभिशङ्खनादैस्सह मुखवादनीयंमुखवाद्यं काहलादिकं यैस्तव पुरो भक्त्या कृतं दत्तमिति यावत्। ते देवाङ्गनाकलकलाकुलदिङ्मुखेषु दिव्यभवनेष्वप्सरोभिस्सह

क्रीडन्तीत्यन्वयः। यद्यपि भेरीदुन्दुभिशब्दयोरेकपर्यायत्वममरेणोक्तं भेरीस्त्रीदुन्दुभिः पुमानिति। तथापि क्रियारुरादिग्रन्थेषु तयोर्भेदो दर्शितः। तथाहि–

दुन्दुभेर्द्विविधो भेदः प्रोक्तस्स्थावरजङ्गमम्।
न भार्या स्थावरैकेन या भार्या जङ्गमा स्मृतेति॥

सुरोचितोऽयं दुन्दुभिः सुरदुन्दुभिः। न स्वर्गदुन्दुभिः। अपि तु देवालये स्थापितो देवतायोग्यस्थिरदुन्दुभिरिति यावत्। तत्र सप्ततालायामस्थिरदुन्दुभिः। चतुस्तालायाम्, चरदुन्दुभिः। भेरीलक्षणमुक्तम्–

स्थूलोन्नताभ्यां सदृशी महावृक्षविनिर्मिता।
तद्वद्धोभयपार्श्वा च भेरी स्याच्चरदुन्दुभिरिति॥

शिवधर्मे–

भेरीमृदङ्गमुरजत्रिमिलापटहादिकम्।
वांशकांस्यादिवादित्रं यः शिवाय निवेदयेत्॥

सविमानैर्नर्मयानै,र्वंशवीणाकृतस्वनैः।
युगकोटिशतं दिव्यं शिवलोके महीयते॥

महामेघध्वनिं दत्वा शङ्खयुग्मं शिवालये।
युगकोटिशतं दिव्यं शिवलोके महीयते॥

पापध्वान्तविघाताय काहलानि समर्पयेत्।
शिवस्य शिवलोकेषु वसेत्कल्पायुतं नर इति ॥ १० ॥

"शम्भो प्रसिद्धविबुधाधिपसिद्धसाध्या
विद्याधरा हरिपितामहलोकपालाः।
अन्येऽपि साधुविधिना सुधियो भवन्त–
माराध्य जग्मुरमराः परमामरत्वम्" ॥ ११ ॥

अमरत्वप्राप्तिहेतुरपि शिवलिङ्गाराधनमेवेत्याह शम्भो इति। हे शम्भो प्रसिद्धो विबुधाधिपः प्रसिद्धविबुधाधिपः देवेन्द्रः। तस्यैव वास्तोष्पतिस्सु-

रपतिरिति प्रसिद्धेः। गोपङ्कजादिवद्योगरूढत्वात्। अथवा विबुधाधिपः इन्द्रः। सिद्धाः उक्ताः। साध्यन्ते आराध्यन्ते इति साध्याः। देवेष्वान्तरगणाः। विद्याधराश्च, विबुधाधिपसिद्धसाध्यविद्याधराः। प्रसिद्धाश्च ते विबुधाधिपसिद्धसाध्यविद्याधराः। हरिपितामहलोकपालाः। तेजोवती, संयमिनी, कृष्णावती, शुद्धवती, गन्धवती, महोदया, यशोवती, लोकपालाः पावकादयः। पातालादितत्तल्लोकपालविशेषाः। अन्ये तदितरेऽमराः। सुधियो ये केचित्प्रेक्षावन्तः। ते सर्वेऽपि। पुरा भवन्तं त्वां। विधिना वेदागमोक्तप्रकारेण। साधु सम्यक्। आराध्य पूजयित्वा। परमामरत्वं जग्मुः। तदेतदविशेषमुदितं शिवधर्मशास्त्रे–

"इन्द्रनीलमयं लिङ्गं विष्णुःपूजयते सदा।
विष्णुत्वं तेन सम्प्राप्तं सार्द्धं च सनातनम्॥

ब्रह्मा पूजयते नित्यं लिङ्गं शैलमयं शुभम्।
तस्य सम्पूजनात्तेन प्राप्तं ब्रह्मत्वमुत्तमम्॥

शक्रोऽपि देवराजेन्द्रो लिङ्गं मणिमयं शुभम्।
भक्त्या पूजयते नित्यं तेन शक्रत्वमाप्तवान्॥

ब्रह्मा विष्णुस्तथा शक्रो लोकपालाश्च देवताः।
लिङ्गार्चनरता ह्येते मानुषेषु तु का कथेति॥

प्रत्येक कथने ग्रन्थभारो भवेदिति एतावतोपरम्यते। विस्तरस्तु तत एवावधार्यः ॥११॥

"गौरीप्रदानसमये गदितेऽचलेन
गोत्रं तवेश किमिति क्षणजातचित्तम्।
धन्यैःपितामहपुरन्दरलोकपालै–
र्दृष्टं निरुत्तरमुखं भवतो हसद्भिः" ॥१२॥

अथ गिरिजाकल्याणकथामुखेनेशस्य परमं प्रकर्षमुद्योतयति गौरीति। अचलेन हिमवता। महेश्वराय। गौरीप्रदानसमये। हे ईश। तव

किं गोत्रमिति । गोत्रं कूटस्थर्षिनाम्नां सङ्कीर्तनमित्यभियुक्ताः । अपत्यं पौत्रप्रभृतिगोत्रमिति पाणिनिः। क्षणजातचित्त-क्षणे उद्वाहकरणरूपे उत्सवे। निर्व्यापारस्थितौ कालविशेषोत्सवयोः क्षणम् इत्यमरः। जातमुत्थितं चित्तं यस्मिन् कर्मणि तद्यथा भवति तथा । गदिते व्यक्तमुक्ते सति । हसद्भिः जगद्योनिं परमेश्वरं किमित्येवं पृष्टवानयमिति हसनं कुर्वद्भिः । धन्यैः । स्वयमुत्तरितवत्वात् कृतार्थैः । पितामहपुरन्दरलोकपालैः । भवतस्तव निरुत्तरमुख प्रतिवाक्यशून्यमास्यं । दृष्टम् । अथवा तव निरुत्तरमुख क्षणजातं चित्तं चिन्तनात्मकं मनो यस्य तत् । तथाविधं दृष्टमिति सम्बन्धः । तदुक्तं सूतसंहितायाम्-हिमवानुवाच-

या सीत्पूर्वं च ते पत्नी सावतीर्णा गृहे मम ।
तामेव तव दानार्थं यातोऽस्मि महेश्वर ।
अमी ब्रह्मादयो देवास्तत्समीपमिहागताः ॥
किं गोत्रमिति पृच्छामि चैषामग्रे विभो तव ।
श्रुत्वा तु भारतीं तस्य विश्वेशो विश्ववन्दितः ॥
किं गोत्रमिति सञ्चिन्त्य नोत्तरं स ससर्ज ह ।
दृष्ट्वा निरुत्तरं शम्भुं जहसुर्देवदानवाः ॥
एष एव जगद्योनिर्गोत्रमस्य कथं भवेत् ।
इत्यूचुर्विविधास्सर्वे हिमवन्तं नगोत्तममिति ॥ १२ ॥

"झङ्कारडम्बरविराजिजलाकुलेषु
कैलासमेरुगिरिगह्वरनिर्झरेषु ।
ते प्राप्नुवन्ति सुरसिद्धवधूव्रजानि[1]
ये नीलकण्ठ तव पादयुगं नमन्ति" ॥ १३ ॥

---

1 कुलानि, M_3, S, K_2,

अथ भक्त्या कृतरुद्रनमस्कारस्य फलमाह झंकारेति। हे नीलकण्ठ। ये जनाः। तव पादयुगं ध्यानपूजानमस्कारार्थं शिवलिङ्गे परीकल्पितचरणद्वितयं। नमन्ति नमस्कुर्वन्ति। ते झङ्कारडम्बरविराजिजलाकुलेषु। झङ्काराः भ्रमरगीतानि। तेषां डम्बराः। आडम्बराः। ते इव स्वनादेन विराजन्तीति झङ्कारडम्बरविराजीनी। तादृशैर्जलैः आकुलेषु व्याप्तेसु। अथवा झङ्काराडम्बरैः विराजिभिः विना चक्रवाकचकोरचक्राङ्गादिपक्षिणां राजिभिः रेखाभिः, जलैश्च व्याप्तेषु। कैलासमेरुगिरिगह्वरनिर्झरेषु। कैलासगिरिमेरुगिर्योर्गह्वराणां सम्बन्धिषु निर्झरेषु प्रवाहेषु। 'प्रवाहो निर्झरो झर' इत्यमरः। सुरसिद्धवधूनां सुरसिद्धजातिस्त्रीणां कुलानि व्रजान्। समूहप्रकरणे। सजातीयैः कुलमित्यमरः॥ प्राप्नुवन्ति– उपभोगार्थं क्षिप्रं प्राप्स्यन्तीत्यर्थः। वर्तमानसामीप्ये वर्तमानवद्वेति वर्तमानप्रत्ययः। यदाहुः– ये नमन्ति विरूपाक्षमीशानं कृत्तिवाससम्। प्रसन्नचेतसो रुद्रं ते यान्ति परमं पदमिति॥ १३॥

"अन्येऽरविन्दमकरन्दहृतालिवृन्द–
मन्दारकुन्ददलदामभिरिन्दुमौले।
पूजां विधाय भवतो विलसन्ति देव
देवेन्द्रमन्दिरवरे सह सुन्दरीभिः" ॥ १४ ॥

अथ कुसुमपूजाफलमाह अन्य इति। इन्दुर्मौलौ यस्य स इति व्यधिकरणपदो बहुव्रीहिः। तस्य सम्बुद्धिः। दीव्यति स्वतःप्रकाशत इति देवः। हेदेव चन्द्रचूड। अन्येऽपरे पुरुषाः। अरविन्दैः पद्मैः। मकरन्दैर्मरन्दैः। हृतमाकृष्टम्। अलिवृन्दं भ्रमरगणो यैस्तानि च। मकरन्दहृतालिवृन्दानि च, मन्दाराणि च, पारिजातपुष्पाणि च तैः। कुन्ददलदामभिः। अच्छिन्नमाध्यपुष्पदलमाल्यैश्च। अथवा अरविन्दैर्मन्दारैः कुन्दैराम्रजम्बूबिल्वादिदलैर्दामभिश्च। यद्वा अरविन्दानां मन्दाराणां कुन्दकुसुमानां। दलानां च। मालाभिः। भवतो लिङ्गरूपिणस्तव पूजां

विधाय कृत्वा। त्वत्प्रसादात्। देवेन्द्रस्य मन्दिरवरे गृहश्रेष्ठे। सुन्दरीभिर्देवस्त्रीभिः सह विलसन्ति। तदुक्तम् 'किञ्चिद्दलं वा चुलुकोदकं वा देवेन्द्रलक्ष्मीं ददते ददासी'ति ॥ १४ ॥

"गर्जत्प्रचण्डघनघर्घरमेघसङ्घ-
सङ्घट्टघोषघनघोररवेण कोऽन्यः।
श्वेतं नयन्तमतिघोरकरालकालं
भस्मावशेषमकरोद्धर हुंकृतेन" ॥ १५ ॥

अधुना श्वेतोपाख्यानमुखेन भगवतः कालहरणापदानमाह गर्जदिति। हे हर। श्वेतं परमधार्मिकं प्रभुमन्त्रोत्साहमन्त्रशक्तिमन्तं समयाचारपालकं दृढव्रतं शिवपूजापरायणमासन्नमरणकालं श्वेतं नामानं राजर्षिं नयन्तं कण्ठे पाशं समर्प्य प्रापयन्तम्। अतिघोरमतिभयङ्करं। करालं दन्तुरम्। उन्नतदन्तमित्यर्थः। 'करालो दन्तुरे तुङ्गे' इत्यमरः। कालमन्तकं गर्जतां गर्जितं कुर्वतां प्रचण्डानामतिकुपितानां। 'चण्डस्त्वत्यन्तकोपनः' इत्यमरः। घनो निरन्तरः। घर्घरः चलद्वारिध्वानो येषां तेषां मेघसङ्घानां सङ्घट्टेन परस्परसंबाधेन यो घोषस्स इव घनो दृढः। घोरो रवो यस्मिन् तेन हुंकृतेन हुंकारेण। 'घनस्सान्द्रे दृढे' इति विश्वः। 'घर्घरस्तु चलद्वारिध्वाने घूर्के नदान्तरे' इति विश्वः। अन्यः भवदपरः को देवः। भस्म भसितम् अवशेषो यस्य तं भस्मावशेषम् अकरोत् भस्मसाच्चकार। न कश्चिदित्यर्थः॥ त्वमेव भक्तवत्सलो जगति अतुलशक्तिः। तथा च कर्तेत्यत्र तात्पर्यम्॥ तदुक्तं स्कान्दे शिवरहस्ये जैमिनिं प्रति दुर्वाससा। 'गर्जन्मेघरवोदग्रहुंकृतेन स तत्क्षणात्। चक्रे भस्मावशेषाङ्गं कालं काममिवोद्यत'मिति। मुनिवेषधारिणे वृत्रघ्ने भरद्वाजादिमुनिभिरप्युक्तम्। तथा च मृगेन्द्रोत्तरम्- क्रोडीकृतो विपाशेन विषज्वालावलीमुचा। हुंकृत्य मोचितः पत्या दृष्टः श्वेतोघनैर्जनै' रिति ॥ १५ ॥

"ये जीवनाय भव भस्मजटास्थिमाला
मायाविनोऽपि दधते हि भवन्ति शम्भो ।
कर्नाट[1]लाटभटहेमकिरीटकोटि-
सङ्घट्टघृष्टचरणा यदि भूमिपालाः" ॥ १६ ॥

अथ दाम्भिकानामपि रुद्रवेषधारणमात्रेण भविष्यत्फलमाह ये जीवनाय इति। भवत्यस्मात्सर्वमिति भवः। हे सर्वोत्पत्तिनिमित्त शम्भो। ये जनाः जीवनाय हि स्वोदरपूरणार्थमेव हि हेतावव्यधारणे इत्यमरः। भस्मजटास्थिमालाः। दधते स्वाङ्गेषु बिभ्रति। ते मायाविनः दाम्भिका अपि कर्णाटलाटभटानां कर्णाटलाटदेशीयभटानां। उपलक्षणमेतत् अन्यदेशीयानामपि। हेम्नःकिरीटानि तेषां कोटीनां सङ्घट्टनेन घट्टनेन घृष्टौ चरणौ येषां ते। तथोक्ताः भूमिपालाः। यदि भवन्ति भविष्यन्त्येवेत्यर्थः। यदीत्यसन्दिग्धे। वर्तमानसामीप्ये भविष्यति वर्तमानप्रत्ययः। तदुक्तं पौराणिकैः 'येऽपि दम्भं समाश्रित्य भक्ता मद्रूपजीविकाः। संसारार्थेऽपि मुच्यन्ते किं पुनर्मत्परा जना' इति ॥ १६ ॥

"क्रीडाप्रपञ्चनिरता[2]श्शिशवो भवन्त-
माराधयन्ति विविधेषु वनेषु देवाः ।
सिद्धास्समस्तकुलशैलगुहान्तरेषु
विद्याधरा मलयमन्दरकन्दरेषु" ॥ १७ ॥

अथ सर्वेषामपि शिवाराधनमस्त्वित्याह क्रीडेति। हे महादेव। भवन्तं लिङ्गरूपिणं। क्रीडाप्रपञ्चनिरताः। क्रीडाविस्तारपरायणाः। शिशवोऽपि। आराधयन्ति। विविधेषु श्वेतवनगणारण्यनैमिषदेवदारुवन-

---

1 कर्णाट M¹, M², S.
2 सुरता M¹

बिल्ववनादिषु वनेषु। देवाश्च। तत्समीहितसिद्धये। त्वामाराध-यन्ति। सिद्धास्तु। समस्तकुलशैलानां। गुहान्तरेषु। गह्वरमध्येषु। त्वामाराधयान्ति। विद्याधरास्तु, मलयमन्दरयोः। कन्दरेषु दरीषु। त्वामाराधयन्ति। अहो! त्वदपूजकः कुत्रापि कोऽपि नास्तीत्यर्थः। यद्यपि "महेन्द्रो मलयस्सह्यश्शुक्तिमानृक्षपर्वतः विन्ध्यश्च पारियात्रश्च सप्तैते कुलपर्वताः"॥ इति किरणागमग्रन्थः। तथापि जीमूतकेतुजीमूत-वाहनादीनां विद्याधराणां मलयाचले प्राचुर्येण प्रवृत्तिरस्तीति सूचयितुं पृथग्वचनम्। मन्दरस्तु मेरोःपूर्वदेशे विद्यते। पूर्वेण मन्रो नामेति किरणतन्त्रम् ॥ १७ ॥

"हे देव हेमपुररम्यरसातलेषु
नागाङ्गनाभिरसुरेन्द्रनितम्बिनीभिः।
नित्यं नितम्बभरमन्थरगामिनीभि-
राराध्यसे च हर मन्मथविह्वलाभिः" ॥ १८ ॥

इत्थं मर्त्यलोके क्रियमाणां महेश्वरपूजामुक्त्वा, सप्तपाताललोकक्रिय-माणामप्याह हे देवेति। सम्बोधनाभिव्यक्त्यर्थं वृत्यनुप्रासार्थं च हे शब्दः प्रयुक्तः। हेदेव स्वामिन् हर! हेमपुररम्यरसातलेषु। इदमत्रावगन्त-व्यम्। यदुक्तं श्रीमत्किरणे भुवनाध्वपरीक्षापटले "श्रीखण्डं त्रिजनाकीर्णं हाटकाधिष्ठितं भवेदिति"। वक्ष्यमाणपातालसप्तकं प्रत्येकं त्रिखण्डं नागदानवरक्षोनामत्रिजनाकीर्णम्। हाटकेश्वरनामरुद्रेणाधिष्ठितम्। तत्राभासतालपरतालनितलगभस्तिमत्तलमहातलपातालानामुपरिस्थितं रसातलम्।

'तत्र मुक्ताफलमयीभूमिर्भुवनभूषिता।
दीर्घिकोद्यानपुष्पाढ्या हेमप्राकारतोरणा॥
रसायनान्नस्त्रीयुक्ता सिद्धद्रव्यसमाकुला।
तत्रास्ते स बलिर्बद्धो वामनेन महात्मना॥

रक्षको नागराजश्च लोहिताक्षश्च राक्षस इति। हेम्नः पुराणि हेमपुराणि। तैःरम्येषु रसातलेषु। रसातलत्रिभागेषु। नागाङ्गनाभिः। स्वाभीष्टसिद्धये। त्वं नित्यं। आराध्यसे पूज्यसे। एवं, नितम्बस्य भरेण भारेण। मन्थरं मन्दं यथा तथा गन्तुं शीलमासामिति नितम्बभरमन्थरगामिन्यः। ताभिः। मन्मथेन विह्वलाभिः असुरेन्द्राणां नितम्बिनीभिः, अङ्गनाभिश्च। स्वकामितार्थसम्पत्तये त्वं नित्यम् आराध्यसे। न केवलं पुंभिः। अपि तु स्त्रीभिरपीति भावः ॥ १८॥

"दिव्यौषधीरसरसायनधातुवादा
योगा वशीकरणगारुडखन्यवादाः।
पातालखड्गघटिकाञ्जनमन्त्र[1]वादाः
सिध्द्यन्ति तस्य शिव यस्य भवान् प्रसन्नः" ॥ १९ ॥

अथ सर्वासामपि सिद्धीनां शिवप्रसाद एव निदानमित्याह दिव्यौषधीति। भो शिव। यस्य भवान् प्रसन्नः, तस्य दिव्यौषधी मृतसञ्जीवनलता। रसस्सिद्धरसः। यदीयस्पर्शाल्लोहः काञ्चनं भवति। रसायनं जराव्याधिभयहेतुरौषधम्। 'रसायनं विडङ्गेऽपि जराव्याधिजिदौषधे इति विश्वः। गैरिकादिधातूनामग्न्यौषधप्रयोगेण सुवर्णिकरणं धातुवादः। योगाः मन्त्रलयहठादयः। वशीकरणं राजवश्यत्वादि। गरुडो देवतास्य गारुडं। विषचिकित्सार्थं मन्त्रयन्त्रौषधप्रयोगः। खन्यवादः भूमिखननेन निक्षेपलब्ध्युपायः। पातालं पाताललोकगमनं, खड्गः। तरवारिः। करवालः। येन सर्वे शत्रवो निहन्यन्ते। स्वयं केनापि न प्रतिहन्यते च, राज्यं च स्वहस्तस्थितं भवति। घटिका घटिकासिद्धिः। अञ्जनमदृश्यदर्शकम्। येन पिशाचादयोऽपि दृश्यतां व्रजन्ति। मन्त्रवादाः भूतवेतालग्रहपिशाचाद्युच्चाटनसाधनभूता मन्त्रसिद्धिः। सर्वा अप्येता मन्त्र-

---

1 सिध्दि M[1], S

सिद्धयः सिद्धयन्ति । अतस्तत्सिद्धयर्थमपि भवानेवाराध्य इति भावः । तदुक्तम्– "तस्मात्सम्पूजयेल्लिङ्गं यदीच्छेत्सिद्धिमात्मन' इति ॥ १९ ॥

"पातालतालतलदानवसुन्दरीभि–
रालिङ्गिता मकरकेतुशरातुराभिः ।
ते शेरते ध्वजपटाकुलमन्दिरेषु
येषां त्वमेव शिव पुण्यवतां प्रसन्नः" ॥ २० ॥

पूर्वोक्तरसातलवत्पातालषट्केऽपि पार्वतीपतिप्रसादफलमाह पातालेति। हे शिव ! येषां पुण्यवतां जनानां त्वमेव प्रसन्नः, आराधनतोषितः । ते जनाः । मकरकेतुशरातुराभिः । मकरो मत्स्यराट् झषः इति वैजयन्ती । केतुर्ध्वजो यस्य सः मकरकेतुः पञ्चबाणः । तस्य शरैरातुराभिः पीडिताभिः । पातालतालतलदानवसुन्दरीभिः । सर्वेषामुपरितनस्य प्रागुक्तरसातलस्याधस्थितं षष्ठं भुवनं पातालम् । महातलसुगभस्तिमत्तलनिलपरतलाभासतालानि तु । तालतलानि । तालस्य पातालस्य । अधस्तलत्वात्तेषां । पाताले तालातलेषु च । याः दानवसुन्दर्यः दैत्यरमण्यः । ताभिरालिङ्गिताम्सन्तः । ध्वजपटैः । आकुलेषु व्याप्तेषु मन्दिरेषु राजभवनेषु । शेरते शयनं कुर्वते । तदुक्तं यज्ञवैभवखण्डे 'शिवप्रसादेन हि भुक्तिरुत्तमा', 'शिवप्रसादेन हि मुक्तिरुत्तमा' । शिवप्रसादेन विना न मुक्तयः, शिवप्रसादेन विना न भुक्तयः ॥ २० ॥

"स्वर्गे विचित्रसुरपादमञ्जरीभि–
र्मन्दाकिनीकनकपङ्कजयोजिताभिः ।
इन्द्रोऽप्सरोभिरसुरैरमरैरुपेतः
पूजां विधाय भवतः प्रणतो महेश" ॥ २१ ॥

अथ इन्द्रस्य स्वर्गाधिपत्यं च शिवार्चनादेवेत्याह स्वर्ग इति । हे महेश पुरा खलु । इन्द्रः । भवतः मणिमयलिङ्गरूपिणस्तव । पूजां विधाय ।

प्रणतः सः स्वर्गेऽमरावत्यां। यत्राहुः– 'दुःखेन यन्न सम्भिन्नं न च ग्रस्तमनन्तरम्। अभिलाषोपनीतं च सुखं स्वर्गपदास्पदमिति॥ मन्दाकिन्यां स्वर्नद्यां। यानि कनकपङ्कजानि। तैर्योजिताभिस्संयोजिताभिः। विचित्राणां नानाविधानां, सुरपादपानां मन्दारपारिजातकसन्तानकल्पवृक्षहरिचन्दनाख्यानां, मञ्जरीभिः पुष्पगुच्छैः विचित्राभिर्वा, सुरपादपानां। मञ्जरीभिर्वल्लरीभिः। उपेतः। किञ्च अप्सरोभिरूर्वश्यादिसुरस्त्रीभिरुपेतः। किञ्च अमरैरसुरैश्चोपेतः। बभूवेति शेषः। तदुक्तं 'ब्रह्मणः सृष्टिकर्त्तृत्वं विष्णोर्दानवमर्दनम्। इन्द्रस्य स्वर्गराज्यं च शिवपूजाविधेः फलमि'ति ॥ २१ ॥

"त्वां दीप्यमानमकु[1]टोत्कटचारुहार-
केयूरकुण्डलधरा गिरिगह्वरेषु।
गन्धर्वलोकललना ललितैर्वचोभि-
रुच्चैःकृताञ्जलिपुटं भगवन् स्तुवन्ति" ॥ २२ ॥

अथ गन्धर्वस्त्रीभिरपि गीयते गौरीपतिरित्याह त्वामिति। हे भगवन्! दीप्यमानानि प्रकाशमानानि मकुटानि शिरोभूषणानि उत्कटानुन्नतान् चारून् मनोहरान् हारान् मुक्तावलीः। केयूराणि अङ्गदानि। कुण्डलानि कर्णवेष्टनानि च। धरन्तीति तथोक्ताः। गन्धर्वलोकललनाः। गन्धर्वलोको मेरुमध्यपर्वतः। तदुक्तं श्रीमन्मृगेन्द्रे 'सिद्धगन्धर्वमरुतां तदधःपर्वसुस्थितिरिति'। तत्र याः ललनास्ताः। गिरिगह्वरेषु। मेरुमन्दरगन्धमादनविपुलसुपार्श्वादिगिरिगुहासु। उच्चैःकृतं शिरसि कृतम् अञ्जलिपुटं परस्परसंयुक्तकरतलयुगलं यस्मिन् कर्मणि तद्यथा भवति तथा। ललितैः सुकुमारैः वचोभिः गीतिकाभिः। त्वां स्तुवन्ति ॥ २२ ॥

---

1 मुकुटो M^1, M^2, S

"ज्ञानं त्रिकालविषयं गगनेचरत्व-
मैश्वर्यमष्टगुणितं श्रवणं च दूरात् ।
उत्क्रान्तिमुक्तिपरकायपरप्रवेशौ[1]
शम्भो भवन्ति भविनां भवतः प्रसादात्" ॥ २३ ॥

अथ परा अपि सिद्धयश्शिवप्रसादादेवेत्याह ज्ञानमिति । हे शम्भो त्रयः काला: भूतभवद्भविष्यन्तो विषया यस्य तत् त्रिकालविषयं, ज्ञानम् । गगनेचरत्वं खेचरत्वम् । अलुक्समासः । अष्टगुणितमैश्वर्यमणिमादिकम् । तदुक्तं श्रीमत्पौष्करे-

पिशाचानां यथोदिष्टमणिमादिगुणाष्टकम् ।
रक्षसां द्विगुणं ज्ञेयं यक्षाणां त्रिगुणं भवेत् ॥
चतुर्गुणं तु गान्धर्वमैन्द्रं पञ्चगुणं भवेत् ।
सोमानां षड्गुणं सप्तगुणं स्यात्तु प्रजापतेः ॥

चतुष्षष्टिगुणं प्रोक्तमैश्वर्यं ब्रह्मणःस्मृतमिति । दूराच्छ्रवणं दूरश्रवणं च। चकाराद्दूरदर्शनमनोवेगादयः। उत्क्रान्तिमुक्तिपरकायपरप्रवेशौ उत्क्रान्तिरुत्क्रमणं प्राणनिर्गमस्तस्याः मुक्तिर्विरहः । स्वेच्छया चिरं प्राणधारणमित्यर्थः । परस्यान्यस्य काये पर उत्कृष्टः प्रवेशः । एतास्सिद्धयः । भविनां जन्मिनां शरीरिणां । भवतः प्रसादात् योगश्रीर्लब्धात् भवन्ति ॥ २३ ॥

"उक्तं शिवेति शिव येन दिवापि रात्रा-
वुत्कण्ठनाद्धर हरेति सकृन्मृषापि[2] ।
सत्यं ब्रवीमि सुरनाथ न पक्षपातं
मूढोऽपि घोरनरकात् स बिभेति कस्मात् ॥ २४ ॥

---

1 प्रवेशा M^1, M^2, S
2 मृषापि येन M^1

अथोमापतेर्नामोच्चारणमहिमानमाह उक्तमिति। हे सुरनाथ शिव! येन जनेन दिवादिवसे रात्रावपि उत्कण्ठनादौत्सुक्यात्। शिव इत्युक्तम्। हरहरेति वा उक्तम्। येन मृषापि मिथ्यापि, शिवेति शिवशिवेति वा। हरेति हरहरेति वा। सकृदप्युक्तं, स तु मूढोऽपि वाच्यवाचकस्वरूपज्ञानरहितोऽपि घोरनरकात्। कस्मात्कारणाद्बिभेति। नक स्मादपि कारणादित्यर्थं। यद्वा कस्माद्घोरनरकाद्बिभेति। रौरवादेः कस्मादपि न बिभेतीत्यर्थः। सत्यं। पुराणादिप्रतिपादितं परमार्थं ब्रवीमि। पक्षपातं शिवभक्तोऽहमितिसमयपक्षपातमिति न ब्रवीमि। तदुक्तं 'शिवेति मङ्गलं नाम यस्य वाचि प्रवर्तते। भस्मीभवन्ति तस्याशु महापातककोटयः॥ प्राणप्रयाणपाथेयं संसारव्याधिभेषजम्। अनन्तदुःखशमनं शिव इत्यक्षरद्वयम्॥ आदित्यपुराणे 'प्रसङ्गात्कौतुकाल्लोभाद्भयादज्ञानतोऽपि वा। हर इत्युच्चरन्मर्त्यः सर्वपापैःप्रमुच्यते॥ इति। ग्रन्थान्तरे–

आहर प्रहर संहरेति वा
व्याहरन्सकृदघैः प्रमुच्यते।
मोचयेत्प्रकृतिकालकर्मतो
नामकीर्तनमुमापतेस्सदा" ॥ २४ ॥

"चर्याविबोधरहिता भवभक्तिमात्रा–
न्नीतास्स्वया शिवपुरं यदहो किराताः।
जातिस्मरत्वमथवा परमामरत्वं
ये त्वां विमुक्तिरथवा भवतःप्रसादात्". ॥ २५ ॥

अथेश्वरो विहितनिषिद्धाकरणरकरयोरपि स्वभक्तानां भक्तिमात्रात्प्रसादतीत्याह चर्येति। हे भव! चर्याविबोधरहिताः श्रुतिस्मृत्युदिताचारपरिज्ञानपराङ्मुखाः। पिशितसमर्पणपादुकास्पर्शनगण्डूषमज्जनप्रभृतिगर्हिताचारकारिणोऽपि किराताः मृगवधाजीवाः कण्णप्पादयो भक्ताः।

भक्तिमात्रात् त्वयि भक्तिरेव। त्वां पूजयन्ति। 'ते त्वया अहो! शिवपुरं शिवलोकं नीताः प्रापिता इति यत्। तस्मात्कारणात् जातिस्मरत्वं पूर्वजातस्मर्तृत्वम्, अथवा, परमामरत्वं प्रकृष्टदेवत्वं, नित्यत्वं वा, अथवा यावा मुक्तिः शास्त्रेषु श्रूयमाणा जीवन्मुक्तिरपरमुक्तिः,' परमुक्तिर्वा, सर्वमप्येतत्, भवतः प्रसादात् भक्त्युत्थापितात् भवतीति शेषः। तथोक्तं स्कान्दे–

"मुनिरपि चक्रप्रदानसमये शिवं प्रति नारायणेन।
यदि तुष्टोऽसि मे देव भक्तिस्त्वय्यचलास्तु मे॥
यया सुदुर्लभान् कामानपि प्राप्नोति मानवः।
यया विहीनः पुरुषो भक्त्या विद्यासहस्रवित्॥
यःसोऽपि श्वपचो देव त्वयि हीनो न संशयः।
यो युक्तः पुरुषो भक्त्या त्वय्यपि श्वपचश्शिवः॥
वरिष्ठस्सद्विजैस्सर्वैर्विद्यापारङ्गतैरपि" ॥ २५ ॥

"तस्मात्करोमि यदभीकरमप्रमेयं
मूढेन शङ्कर मया यदकारि पापम्।
सत्वं पशुत्वतिमिरं भवपाशमीश
च्छिन्धि प्रसह्य भगवन्नपुनर्भवाय" ॥ २६ ॥

अधुना शङ्करं प्रति कर्मबीजमूलपाशच्छेदं याचते तस्मादिति। शं सुखं करोतीति शङ्करः करोतीति शङ्करः ईष्टे स्वातन्त्र्येणेति ईशः। हे भगवन्! ईश! शङ्कर! न विद्यतेऽन्यद्भीकरं यस्मात्तदभीकरमत्यन्तभीकरम्, अप्रमेयं प्रमातुमशक्यं, पापं यद्यस्मात्कारणात् अहमिदानीम् अज्ञानात्करोमि। यद्यस्मात् मूढेन आसाद्य विद्यामूढेन मया पापमकरि। पापं कृतम्। पूर्वं कृतम्। तस्मात् तद्धेतुं पशुत्वतिमिरं आत्मनां पशुत्वव्यवहारकारणत्वात्पशुत्वाख्यं तिमिरं दृक्प्रतिबन्धकत्वात्तिमिरसंज्ञं

भवपाशं, भवहेतुः पाशो भवपाशः। तदुक्तं तन्त्रे 'तद्भावभाविनो भावाः सर्वे मायात्मकाः पशो'रिति। पाशसाधर्म्यात् पाशः। साधर्म्यं च स्वैरगतिप्रतिबन्धकत्वम्। भवहेतुम् आणवाख्यमनादिपाशम्। सः भक्तिमात्रतुष्ट इति प्रसिद्धः। त्वं अपुनर्भवाय मम पुनरुत्पत्तिनिवृत्तये प्रसह्य हठात् छिन्धि। यच्छेदे पुनर्भवो नास्त्येव। कारणाभावे कार्याभावादिति भावः। प्रार्थनायां लोट् ॥ २६ ॥

"त्वत्पादपूजनरता मुनयो वनेषु
तिष्ठन्तिमू लदलकन्दफलाशिनो ये।
ते यान्ति मुक्तिपदमीश्वर तावदास्तां
धन्यास्तु ते तव मुखान्यवलोकयन्ति" ॥ २७ ॥

अथ मुनीनामीश्वरप्रसादमाह त्वत्पादेति। हे ईश्वर! ये भृग्वादयो मुनयः। मूलानि दलानि पर्णानि कन्दान् फलानि च अश्नन्तीति मूलदलकन्दफलाशिनः सन्तः। वनेषु देवदारुवनाश्रमेषु। त्वत्पादपूजने रताः तत्पराः तिष्ठन्ति। ते मुक्तिपदं मुक्तिस्थानं यान्ति। इत्येतत्तावत् आस्तां तिष्ठतु। न हि तत्रादरस्तेषामिति भावः। अपि तु धन्याः कृतार्थाः। ते मुनयः तव मुखानि पञ्चवक्त्राणि। अवलोकयन्ति पश्यन्ति। अहो! भाग्यमिदं मुनीनां, यद्दर्शनाशक्यमपि वस्तु पश्यन्ति। तदुक्तम्–

'यदेतच्छशिना युक्तं हस्तपादादिसंयुतम्।
रूपं मम सुदुर्दर्शं योगिनामपि शाङ्करमि'ति ॥

उक्तञ्च स्कान्दे कालिकाखण्डे–

'पुराहिमवतः पृष्ठे देवदारुवने शुभे।
भृग्वादयस्सपत्नीकाः पुत्रपौत्रमन्विताः ॥
चत्वारिंशत्सहस्रेण सहस्रैस्सार्धमष्टभिः।
द्रष्टुकामा महादेवं योगिध्येयं सनातनम् ॥

सर्वज्ञं सर्वकर्तारमनेनैव हि चक्षुषा ।
शीर्णपर्णाशिनःकेचिच्छाकमूलफलाशिनः ॥
लिङ्गार्चनपराःकेचिद्भस्मोद्धूलितविग्रहा, इत्यादि

वहु । तदा मुनींनां रागद्वेषपरीक्षार्थं तत्पत्नीनां पुरतः, शिवे सुन्दराकारिणि सति, समुत्थितं तासाम् अनङ्गचेष्टितं दृष्ट्वा क्रुद्धाः मुनयः शिवद्रोहाय होमंचक्रुः । सोऽपि प्रपन्नार्तिहरो मुनीनामालोक्य मायामखिलां विमोहितां तेषां व्यपोह्य प्रसभं घृणानिधिः भक्तिं ददौ पाशलयेपटीयसी । ततो अचिरेण कालेन विमुक्ता मामवाप्स्यथ इत्युक्त्वा अन्तर्दधे देवो मुनीनां पश्यतां तदेति ।। अन्यत्राप्युक्तम् 'आदित्या वसवोरुद्रा मुनयश्च महौजसः । विधिवल्लिङ्गमाराध्य पदमिष्टतमं गता' इति ॥ २७ ॥

"स्फीते प्रथिम्नि जघने घनपाटलिम्नि
बिम्बाधरे कुचयुगे द्युति[1]पिञ्जलिम्नि ।
स्त्रीणां महेश विलसन्ति कुतो नराश्च
यैर्नार्चितोऽसि न नतोऽसि न संस्तुतोऽसि" ॥ २८ ॥

अथ शिवलिङ्गार्चननमस्कारस्तोत्रवर्जितानां नराणां नितम्बिनीनिषेवणसौभाग्यमसम्भावितमेवेत्याह स्फीत इति । हे महेश यैर्नरैः त्वं अर्चितो नासि । नतो तमस्कृतोऽपि नासि । संस्तुतोऽपि नासि न भवसि । ते नराः स्त्रीणां विलासिनीनां प्रथिते वेम्नि पृथुत्वे विषये जघने कटिपुरोभागे । 'जघनं तु स्त्रियाः श्रोणिपुरोभागे कटिस्थले' इति विश्वः । घनः सान्द्रः पाटलिमा पाटलत्वं यस्य तस्मिन् । घनपाटलिम्नि बिम्बमिव अधरो बिम्बाधरः । तस्मिन् । द्युतो दीप्तः पिञ्जलिमा पीतिमा पीतत्वं यस्य तत् द्युतपिञ्जलिम् । 'पिञ्जरं कनके वाजिभेदेपीते च पिञ्जरे' इति रेफान्तेषु विश्वः । रलयोरभेदः । तस्मिन्

---

1 द्युत M^1, M^2, S

कुचयुगे कुतो विलसन्ति क्रीडन्ति। न कुतश्चिदित्यर्थः। किन्तु लिङ्गपूजयैव असदृशं महाफलं सिध्यतीति भावः। यदाहुः—

'यद्वारे मत्तमातङ्गा वायुवेगास्तुरङ्गमाः।
पूर्णेन्दुवदना नार्यः शिवपूजाविधेः फलम्' ॥ २८ ॥

"प्रोद्दामकाममदिरामदलोल नेत्रा
रत्नावलीझणझणारवरम्यगात्राः।
ते यक्षलोकवनितासु चिरं रमन्ते
ये त्वां स्मरन्ति सततं मकरध्वजारे" ॥ २९ ॥

इदानीं यक्षकुमारीनिषेवणमपि शिवस्मरणलभ्यमित्याह प्रोद्दामेति। हे मकरध्वजारे। मीनकेतनवैरिन्! ये त्वां सततं स्मरन्ति। यक्षलोकवनिता, सम्भोगार्थमिति शेषः। ते प्रोद्दामा उन्मत्तः कामो मदन एव मदिरा मद्यं। तया यो मदस्तेन लोले तरले नेत्रे येषां ते तथोक्तास्सन्तः। किञ्च रत्नावलीनां रत्नहाराणां झणझणारवेण झणझणेति आरवेण नादेन रम्यं गात्रं येषां ते तथोक्तास्सन्तः। यक्षलोकवनितासु यक्षलोके अलकायां। याः वनिताः जनितात्यर्थानुरागाः कामिन्यः। तासु। 'वनिता जनितात्यर्थानुरागायां च योषिती'त्यमरः। चिरं रमन्ते क्रीडन्ति। ईश्वरस्स्वयं मकरध्वजारिरपि स्नस्मर्तॄणां मकरध्वजकृत्यं संवादयत्येव। उपासत सङ्कल्पादिसहकारिविशेषसामग्रीभेदादुपपत्तेरिति ध्येयम् ॥ २९ ॥

"अन्धस्य मे हृतविवेकमहाधनस्य
चोरैःप्रभो बलिभिरिन्द्रियनामधेयैः।
संसारकूपकुहरे विनिपातितस्य
देवेश देहि कृपणस्य करावलम्बम्" ॥ ३० ॥

अथ भवकूपनिमग्नस्वोद्धारमभवं याचते—अन्धस्येति। कर्तुमकर्तुमन्यथाकर्तुं च यःप्रभवति स प्रभुरित्युच्यते। देवानामीशो देवेशः। हे प्रभो स्वामिन् देवेश। अन्धस्य असाद्यविद्यानिरुद्धवृतेः। अत एव इन्द्रियनामधेयैरिन्द्रियाख्यैः बलिभिर्बलवद्भिः चोरैः विवेकतस्करैः हृतविवेकमहाधनस्य। विवेकः प्रकृतिपुरुषविवेक एव महाधनं, तत् हृतम् अपहृतं यस्य तस्य। किञ्च ससार एव कूपः ससारकूपः। वर्णपदमन्त्राःकलातत्त्वभुवनानीत्येने षडध्वानः आत्मनां संसारः, तस्य संसारकूपस्य कुहरे विले अन्तरिति यावत्। विनिपातितस्य निपातनं कारितस्य। अत्रापि इन्द्रियनामधेयै श्चोरैरिति सम्बध्यते। कृपणस्य उद्धारकाभावाद्दैन्यवतः मे मम। करावलम्बं, करस्य अनुग्रहशक्तेरवलम्बमालम्बनं देहि, येनाहं निर्मलं निरतिशयमूर्ध्वंधाम निरातङ्कं गमिष्यामीति स्वाभिसन्धिः। प्रार्थनायां लोट्। एवं हि गीयते—

'विष्णुनापि परेणापि महादेवं घृणानिधिम्।
विना जन्तूंस्समुद्धर्तुं शक्यते नहिसत्तम इति" ॥ ३० ॥

"मूढो विवेकविकलो स[1]कृदूर्ध्वबाहुः
किं न श्रुणोषि यदहं हर रारटीमि।
मां तत्र कर्मणि नियोजय देव येन
संसारचक्रगहनं न पुनर्विशामि" ॥ ३१ ॥

सम्प्रति अभिलषितभोगमुक्त्यनन्तरमात्मनः पुनस्संसारप्रवेशपरिहारं प्रार्थयते मूढ इति। मूढोऽनाद्यविद्याशक्त्याछन्नस्वकीयचिच्छक्तिः। अत एव। विवेकविकलः प्रकृतिपुरुषविवेकशून्यः। अनित्याशुचिदुःखानात्मसु नित्यशुचिसुखात्मप्रतिपत्तिमानित्यर्थः। अहं ऊर्ध्वबाहुस्सन् असकृत्पुनःपुनः तवाग्रे रारटीमि भृशं रटामि। उच्चेरुच्चरामीति यत् तत्

---

1 लोऽसकृ M^1, M^2, S

आर्तक्रन्दनं किं किमर्थं ? न श्रुणोषि, अवश्यं श्रोतव्यम् । आर्तघोषो दयालुभिर्नोपेक्षा कार्येतिभावः । यच्छ्रोतव्यं तदाह मामित्यादि । हे देव मां तत्र कर्मणि तस्यां क्रियायां, नियोजय प्रेरय । येन कर्मणा अह संसारचक्रगहनं संसारश्चक्रमिव संसारचक्रम् । अथवा संसार एवचक्रं तत्र यद्गहनं दुःखं तत् पुनः भूयः । न विशामि । यद्वा संसारचक्रं भवसमूहः । 'चक्रं चयेजलावर्ते रथाङ्गे राष्ट्रसैन्ययोः । घनसाधनयन्त्रे स्त्रीकलीबे कोके तु पुंस्ययमि'ति नानार्थरत्नमालायाम् । तदेव गहन गह्वरं काननं वा । तत् । पुनर्नाविशामि । न प्रविशमीति । सिंहावलोकनन्यायेन सम्बन्धः । तदाहुः । 'अज्ञोजन्तुरनीशोऽयमात्मनस्सुखदुःखयोः । ईश्वरप्रेरितो गच्छेत्स्वर्गं वा श्वभ्रमेव वे'ति । तच्च कर्म वेदागमविहितगुरूपदेशलब्धलिङ्गार्चनादिसत्क्रियानुष्ठानमेवेति ब्रूमः । तदुक्तम्-

'संसारदुःखकान्तारे निमग्नश्चमहातपे ।
चक्रवद्भ्राम्यते देवि लिङ्गार्चनविवर्जितः ॥

सकृदभ्यर्चनाल्लिङ्गे मुक्तस्संसारबन्धनादिति ।

आगमाः श्रुतयश्च अमुमर्थं संवदन्ति इति अलं सिद्धार्थसाधने सम्भ्रमेण ॥ ३१ ॥

"मायाप्रपञ्चरचनाचतुरा समस्त-
वस्तुप्रभेदभिदुरा शिव सर्वकर्त्री ।
संसारपाशविषमच्छिदुरा नराणां
मोहान्धकारभिदुरा च तवैव शक्तिः" ॥ ३१ ॥

त्वं पासीत्यादिना पूर्वं परमेश्वरः पञ्चकृत्यकृदिति कथितः । सम्प्रति तच्छक्तिरपि तादृशीत्याह-मायाप्रपञ्चेति । भो शिव । सततोदितस्य पत्युः तवैव सम्बन्धिनी शक्तिः, इच्छाद्यनेकशक्तिसमष्टिरूपिणी संविच्छक्तिः उक्ता मायाप्रपञ्चरचनाचतुरा । अन्येषां पशूनां सम्बन्धिनीनां शक्तीनामनादिपाशावरुद्धत्वेन स्वतःप्रसराभावात् । माया

उभयविधा अधोमाया, ऊर्ध्वमाया चेति। तस्याः प्रपञ्चः। शिवेच्छा-निरुद्धः शुद्धाशुद्धरूपः कार्यरूपो वर्गः। तस्य रचनायां स्वस्वविषयावस्था-पनें चतुरा दक्षा एतेन स्थितिरुक्ता। समस्तानां शुद्धाशुद्धरूपाणां वस्तूनां कार्याणां प्रभेदाः विशेषाः। तेषां भिदुरा भेदनशीला, माया महामाययो-रुपसंहरणशीला। अनेन सहार उक्तः। यद्यपि विदिभिदिच्छिदेःकुरजि-त्यत्र, भिदुरं काष्ठंछिदुरा रज्जुः। कर्मकर्तरिप्रयोगो भिदिच्छिद्योरिति-वृत्तिकार उदाजहार। तथापि निश्शेषपाशपटलच्छिदुरानिमिषादिति। विविधोपाधिसंभेदविवर्तभिदुरोदयेति ताच्छील्येऽपि प्रयोगान्न दोषः। सर्वेषां शुद्धाशुद्धरूपाणां कार्याणां कर्त्री। मायामहामायाभ्यां जगदुपादा-नाभ्यामुत्पादिका। अनेन सृष्टिरुक्ता। नराणां भोक्तृणां संसार एव-पाशाः संसारपाशः, तत्र यद्विषमं परस्परविद्धसमबलाभयकर्मव्यतिरिक्तं समं कर्म, तस्य छिदुरा भोगभोजनेन च्छेदनशीला। अनेन तिरोभाव-उक्तः। तदुक्तं श्रीमत्पौष्करे-

'यतः कर्मसमत्वेऽपि तदन्येषां तु कर्मणाम्।
अपाके परमेशाज्ञा विरुद्धान्यफलप्रदेति॥

परमेशाज्ञावामशक्तिविरुद्धकर्माणि विधूय ताभ्यामन्येषां कर्मणां फल-प्रदावस्थिता, न त्वनुग्रहोन्मुखीति भावः। उक्तं च त्रिलोचनशिवैः। तत्रासमात्मीयपुण्यापुण्यकर्मणामणूनां बन्धकरः, शिवः। पुण्यस्यापुण्यस्य। पुण्ययोरपुण्ययोर्वा यदात्वसाम्यं कस्यचित्तीव्रवेगित्वमन्येषामतीव्रवेगित्वं, तदा तत्कर्मकर्तारं तद्भोगाय योजयति। यदा तु साम्यं तदा मोक्ष-कर इति। किं च मोहामलकृतः स एवान्धकारः। तस्य भिदुरा दीक्षा-रूपेण भेदनशीला। अनेनानुग्रह उक्तः। अथवा मायाप्रपञ्चरचनानां चतुरेत्यनेन स्थितितिरोभावौ कथितौ। समस्तवस्तुप्रभेदभिदुरा सर्व-कर्त्रीभ्यां पदाभ्यां सहारसृष्टिसंहारपाशविषमच्छिदुरा मोहान्धकार-भिदुरेत्याभ्यां पदाभ्यांमनुग्रहः। तत्र संसारपाशविषमस्तिरोधायक-शक्त्यधिकारः। तच्छेदनशीलेत्यर्थः। मोहान्धकारभिदुरेत्यस्यार्थः-

प्राग्वदेव। यदुक्तं श्रीमन्मृगेन्द्रे

तमश्शक्त्यधिकारस्य निवृत्तेस्तत्परि-च्युतौ।
व्यनक्ति दृक्क्रियानन्त्यं जगद्बन्धुरुदिश्व' इति ॥ ३२ ॥

"छित्वा समस्तमशुभं भवपाशराशि-
मीषत्प्रकाशमवशं स्वबलासिना मे।
तेजोनिधानममलं भगवन् प्रयच्छ
सर्वज्ञतायुतमशेषकरं शिवत्वम्" ॥ ३३ ॥

इदानीं दीक्षैकलभ्यं मुक्तिव्यक्त्यात्मकं परमपुरुषार्थम् आत्मनः प्रार्थयते छित्वेति। हे भगवन्! अशुभं जन्ममृत्युजराव्याधिदुःखभीतिशोकमोहरागद्वेषमदक्रोधाद्यशुभहेतुत्वादशुभम्। अवशमस्वायत्तम्। ईषत्प्रकाशं तत्तद्विषयैकदेशसङ्कुचितप्रकाशं समस्तंबहिरन्तःकरणकलाकर्मादिकम्। मे भवपाशराशि भवहेतवः पाशाः, भवपाशाः तेषां राशिं पुञ्जं, यद्वा भवेति सम्बुद्धिः। पाशराशिमितिच्छेदः। स्वबलासिना। स्वस्य तव बलं ज्ञानक्रियात्मिका शक्तिः। तदेव असिः खड्गस्तेन छित्वा। तेजोनिधानं तेजसो ज्ञानात्मकप्रकाशस्य निधानम् आश्रयम्। अमलं निर्मलं, सर्वज्ञातायुतं सकलपदार्थसाक्षात्कारित्वसम्पन्नम्। अशेषकरं सर्वकृत्यकरणक्षमम्। इत्येतादृग्लक्षणं शिवत्वंस्वसत्तां, प्रयच्छ देहि। व्यञ्जयेत्यर्थः। तदुक्तं श्रीमन्मतङ्गे-

"ज्ञानं नाम स्वसत्तैव या सा ज्ञानक्रियात्मिका।
सा शक्तिस्य संस्पर्शाद्व्यक्तिभूतासु निर्मला" ॥
पत्युर्दानं तदेवोक्तं न स्वयं व्यज्यते पशोरिति ॥ ३३ ॥

"बालोऽपि संस्मरणमात्रमचेतनस्ते
लिङ्गं करोति हर पांसुमयं विनोदात्।
अःयन्तदेशधनधान्यसमृद्धिभाजि
राज्यं करोषि हतकण्टकमुन्नतं च" ॥ ३४ ॥

अथ धूलीकेलिलोलुभेन बालेन लीलया मृण्मयलिङ्गकरणे यत्फलं तद्भ-णति बालोऽपीति। हे हर! अचेतनः अज्ञः। बालोऽपि। विनोदात् क्रीडावशात्। पांसुमयं मृण्मयं। ते तव सम्बन्धि लिङ्गं संस्मरणमात्रं यथा भवति तथा, न तु शिवागमोपदिष्टसर्वलक्षणसमेतमित्यर्थः। करोति निर्माति। तस्य। त्वं अत्यन्तानामपरिमितानां देशानां धनानां धान्यानां समृद्धिं भजतीति वा अत्यन्तदेशधनधान्यसमृद्धिं भजतीति वा। तादृशं ताच्छील्ये णिनिः। हतकण्टकं परिहतप्रत्यूहम्। उन्नतमत्य-धिकम्। राज्ञःकर्म प्रजापरिपालनात्मकं राज्यं करोषि। किं पुनर्वि-धिना लिङ्गं प्रतिष्ठाप्य समन्त्रं साङ्गं यजतो भक्तस्येति भावः। तदुक्तं सौरसंहितायाम्-

"पांसुना क्रीडमानोऽपि लिङ्गं कृत्वा स वै नरः।
प्रेत्यान्ते लभते राज्यं सुसम्पन्नमकण्टकम्" ॥

क्रीडन्ति शिशवो यत्र लिङ्गं कृत्वा यजन्ति ये।
सैकतं मृण्मयं वापि ते भवन्त्येव भूभुज इति ॥ ३४ ॥

"ये पापकर्मगुरुतल्पगहेमचोर-
ब्रह्मघ्नगोघ्नचपलातुरपातकाश्च।
ते नीलकण्ठ परमेश्वर पादलग्ना
निर्धौतपापशशिनिर्मलशुद्धदेहाः" ॥ ३५ ॥

अथोपेतसमस्तपातका अपि पुरुषाः परमेश्वरपादसेवनादपेतपातका भवन्तीत्याह ये पापेति। नीलः कण्ठो यस्य सः नीलकण्ठः। परम-श्चासावीश्वरश्च परमेश्वरः। "सन्महत्परमोत्तमोत्कृष्टाः पूज्यमानै-रिति कर्मधारयसमासः। भो नीलकण्ठ परमेश्वर। ये पाप कर्म येषां ते पापकर्माणः। महापातकसमानकर्माणः। मातापितृपरित्यागकूट-साक्ष्यवादकृदादयः। तदुक्त शिवधर्मोत्तरे 'महापातकतुल्यानि पापा-न्युक्तानि यानि तु। तानि पातकसंज्ञानि तदूनमुपपातकमिति। गुरु-

तल्पगाः। गुरुदारगामिनः। 'तल्पं शय्याट्टधारेष्वित्यमरः। हेम्नश्चोराः हेमचोराः। ब्रह्मघ्नाः ब्राह्मणघातकाः। यद्यपि' ब्रह्मभ्रूणवृत्रेषु क्विबि'ति क्विबुक्तः। तथा हि पुराणादिप्रयोगानुसारादित्थंप्रयोगः। तथा च शिवधर्मोत्तरम्–

'ब्रह्मघ्नश्च सुरापी च स्तेयी च गुरुतल्पगः।
महापातकिनस्त्वेते तत्संयोगी च पञ्चम' इति।

गोघ्नाः गोघातकाः। चपलासु पुंश्चलीषु आतुराः कामातुराः पातकाश्चपलातुरपातकाः। एते उपपातकिनः उक्ताः। 'चपला कमला विद्युत्पुंश्चलीकट्फलीषु चेत्ति विश्वः। चकारेण देवद्रव्यशिवज्ञानपुस्तकापहर्त्तृप्रभृतयो अतिपातकिनस्त्वमुचिताः ते जना अपि। पादलग्नाः भवदङ्घ्रिसक्तास्सन्तः निर्धौतं प्रक्षालितं पापं यैस्ते निर्धौतपापाः। निर्धूतपापा इति पाठान्तरेतु नितरामुत्सृष्टपापाः। शशिवद्बालचन्द्रवनिर्मलो निष्कलङ्कः शुद्धो वा बैन्दवो देहो येषां ते शशिनिर्मलशुद्धदेहाः। निर्धूतपापाश्च ते शशिनिर्मलशुद्धदेहाश्च निर्धूतपापशशिनिर्मलशुद्धदेहा इति हेतुहेतुमद्भावेन विशेषणसमासःभवन्तीति शेषः। आह शातातपः–

"सुरां पीत्वा गुरुदारांश्च गत्वा
स्तेयं कृत्वा ब्रह्महत्यां च कृत्वा।
भस्मच्छन्नो भस्मशय्याशयानो
रुद्रध्यायी मुच्यते सर्वपापैरिति॥

स्तोत्रान्तरेऽप्युक्तम्। जगति न तदस्ति पापं हरति नयतेऽङ्गिसंस्मरणमिति। उक्तं चैकपादपुराणे कुतःपातं नराणां तु लिङ्गार्चनरतात्मनाम्। शुद्धस्फटिकसङ्काशाः शिवलोकं व्रजन्ति ते। इति ॥ ३५ ॥

"ये त्वां विभो सवनकालनकल्पितेषु
सम्यग्यजन्ति विविधेषु शिवव्रतेषु।

ते चातुरङ्गघनकुङ्कुमपिञ्जरेषु
विद्याधरीषु विलसन्ति कुचान्तरेषु" ॥ ३६ ॥

अथ काम्यपूजाफलमाह ये त्वामिति। हे विभो व्यापक! ये साधकाः सवनं यजनं। सवनं यजने स्नाने सोमनिर्दलनेऽपि चेति विश्वः। कलनं कालः। कलनानां समूह कालनम्। 'तस्य समूह' इत्यण्। सवनस्य कालनं सवनकालनम्। यजनकालाः। प्रातर्मध्याह्नसन्ध्यार्धरात्राः। अष्टमीमाघकृष्णचतुर्दशीचन्द्रवासरादयो वा। तत्र कल्पितेषु। मयैतत्प्राप्तये कर्तव्यानीति सङ्कल्पितेषु। विविधेषु दानहोमस्नानोपवासध्यानपूजास्तोत्रपुराणपठनजपतपःप्रमुखेषु नानाप्रकारेषु शिवव्रतेषु समाहितास्सन्त इति शेषः। सम्यक्शास्त्रोक्तप्रकारेण त्वां यजन्ति पूजयन्ति। ते विद्याधरीषु विद्याधरजातिस्त्रीषु। चतुरङ्गानां कर्पूरागरुकस्तूरीतक्कोलानां यक्षकर्दमाङ्गानां परिमलद्रव्याणां समूहश्चातुरङ्गं तेन घनेषु सान्द्रेषु कुङ्कुमवत्पिञ्जरेषु पीतेषु कुचान्तरेषु स्तनमध्येषु विलसन्ति। यक्षकर्दमलिप्तेषु विद्याधरीकुचमध्येषु क्रीडन्तीत्यर्थः। तदुक्तमेकपादपुराणे—

'यान्यान्यनुस्मरन्कामान् लिङ्गाराधनतत्परः।
तांस्तान्सर्वानवाप्नोति मानुषो देवि काम्यया' ॥
यक्षविद्याधरत्वं च पातालं वा नभस्थलम्।
यक्षाणां चैव भोगश्च लिङ्गस्याभ्यर्चनाद्भवेत् इति ॥ ३६ ॥

"यत्पद्यते कमलयोनिरभिष्टुवन्तं
साक्षाच्चतुर्भिरधिनाथ मुखैर्भवन्तम्।
त्यक्त्वा वयं तु घनसंस्तवनक्रियासु
भक्तिप्रमाणमिति सर्वमिदं क्षमस्व" ॥ ३७ ॥

अथ स्वाहङ्कारं परिहरन् स्तवमुपसंहरति यत्पद्यत इति। अधिको नाथः अधिनाथः। हे अधिनाथ यद्यस्मात्कारणात् कमलं विष्णुनाभिकमलं योनिः निर्गमनद्वारं यस्य सः कमलयोनिः केचिन्मूढाः कमलं नारायणनाभिकमलं योनिरुत्पत्तिकारणं यस्येति व्युत्पादयन्ति। तत्तु। ततोऽसौ नाभिपद्मस्य नालमार्गमभिन्नहेतिनिर्गमनबोधकपुराणविरुद्धत्वादनादरणीयम्। सर्वत्र शिवस्यैव ब्रह्मोत्पादकश्रवणाच्च। ब्रह्मा चतुर्भिर्मुखैः अभिष्टुवन् अभितः स्तुवन्। तं पञ्चवक्त्राद्याकारलक्षितं लिङ्गस्थं। भवन्तं त्वां साक्षात्प्रत्यक्षं पद्यते जानाति। न तु स्वसामर्थ्येन माद्यतु। स येन केन कालेन पपाताधःपितामह इति पुराणवचनात्। पद्यते इति वर्तमानप्रयोगान्मुहुर्मुहुः पश्यतीत्यर्थः। ये गत्यर्थास्ते ज्ञानार्थाः। तस्माद्धेतोः। वयं तु कतिपयाक्षरलिप्तैकजिह्वाः। घनासु निरन्तरासु, तव संस्तवनक्रियासु त्यक्ताः त्यक्तवन्तः। कर्तरि क्तः। संस्तवनक्रियास्त्यक्तवन्तः इत्यर्थः। यदुक्तमादित्यपुराणे

'यतो वाचो निवर्तन्ते अप्राप्यमनसा सह।
भर्गाद्विश्वस्य भरणात् विश्वयोनिरुमापति'रिति ॥

इदं तु प्राक्कृतं सर्वम्। भक्तिः प्रमाणं हेतुरस्येति भक्तिप्रमाणमिति। क्षमस्वेति प्रार्थनायां लोट्। प्रमाणं हेतुमर्यादाशास्त्रेयत्ताप्रमातृष्वित्यमरः ॥ ३७ ॥

"गङ्गातरङ्गजलधौतजटाकलाप
कामाङ्गदग्धसितभस्मविभूषिताङ्ग।
चन्द्रार्धशूलफणिराजविराजिताङ्ग
देवाधिदेव तव पादयुगं नमामि" ॥ ३८ ॥

अथ स्तोत्रान्तेऽपि महेशचरणनमस्काररूपं मङ्गलं निबध्नाति गङ्गेति। गङ्गायाः तरङ्गाणां जलैर्धौतः क्षालितः जटाकलापो जटासन्ततिर्यस्य

तस्य सम्बुद्धिस्तथा। कामस्य प्रसूनबणैः प्रहरतः प्रद्युम्नस्य अङ्गानामवयवानां दग्धः दाहः। 'नपुंसके भावेक्तः'। तेन यत्सितं धवलं भस्म तेन विभूषितान्यङ्गानि यस्य तस्य सम्बुद्धिस्तथा। अनेन शम्भोरनितरसाधारणमनन्यहेतुकमनपरपरिहार्यं वैराग्यमुद्घोषितम्। चन्द्रस्यार्धश्चन्द्रार्धः। शूलं त्रिशूलं। फणिनां राजानः फणिराजाः। तैर्विराजितान्यङ्गानि यस्य स तथोक्तः। ततस्सम्बुद्धिः। पुरा किल भगवान् दारुवने चरतां भृग्वादिमुनीनां रागद्वेषपरीक्षार्थं भिक्षुच्छलेन तदाश्रमपदं प्रपेदे। तदानीं तत्रत्या ऋषिपत्यः तदाकारं दृष्ट्वा विस्रस्तवस्त्रा बभूवुः। तदालोक्य मुनयो मन्युवशंगताः शिवोऽयमित्यविज्ञाय कुतस्त्वोऽयं धूर्तः पतिव्रता अप्येवं विकारिणीः करोतीति तन्मारणार्थं कुण्डेष्वग्निमाधाय आभिचारफलप्रदैराथर्वणैर्होमद्रव्यैर्जुहावांचक्रुः। ततो हुताशनादुत्थितान् शूलाद्यायुधगणान् पञ्चपणान्विषोल्बणान् निश्वसतो नागानपि देवः स्वाङ्गेषु धारयामास। वैनतेयभयोद्विग्नैर्वासुकिप्रमुखैरपि निजां तनुमलञ्चक्रे इति पौराणिकी कथा। देवानामधिको देवो, देवाधिदेवः। यच्छ्रूयते। यो देवानां प्रभवश्चोद्भवश्च यस्मिन् देवा अधिविश्वे निषेदुः, यस्तं न वेद किम् ऋचा करिष्यति य ईशो अस्यद्विपदश्चतुष्पदस्तस्मै रुद्राय हविषा विधेमेति। हे महादेव। तव पादयुगं भक्तानुग्रहार्थं परिकल्पितं चरणद्वयम्। पद्ये गच्छति प्रवर्तते जानाति आभ्यां सर्वमिति पादौ। देवस्य ज्ञानक्रियाशक्ती, तयोर्द्वयं च नमामि ॥ ३८ ॥

"स्तोत्रं मया कृतमिदं भवतो गणेन
वृत्तैर्वसन्ततिलकैः शिवमल्हणेन।
आयासमत्र भगवन्गदितं दुरुक्तं
भक्तिप्रमाणमिति सर्वमिदं क्षमस्व" ॥ ३९ ॥

अथ स्वनामकीर्तनपुरस्सरं स्वसर्वदुरुक्तसहनं प्रार्थयते स्तोत्रमिति। हे शिव गण्यते भक्तमध्ये इति गणः। भवतस्तव गणेन भक्तेन मल्हणेन

मया वसन्ततिलकैर्वृत्तैः। इदं स्तोत्रं गुणाभिधानं कृतम्। हे भगवन्। अत्र स्तोत्रे गदितं मया जल्पितम् आयासमायासभूतं, सर्वमिदं दुरुक्तम्। भावे क्तः। दुष्टोक्तिं, भक्तिप्रमाणं भक्तिहेतुकमिति। क्षमस्व। दुरुक्तमपि मुग्धेन भक्त्या कृतं चेत्सोढव्यमिति भावः॥ यद्यपि कान्ताकचेत्यादि षट्त्रिंशद्वृत्तैः स्तोत्रमिदं मल्हणेनाभाणीति पाल्कुरिकीसोमेश्वरेण भणितम्, तथाप्युपरितनं वृत्तत्रयं बहुपुस्तकस्थितत्वाद्बहुपाठसंमतत्वाद्व्याख्यातम्। वस्तुतस्तु युक्तिमद्भिः प्रक्षिप्तम्। श्रीमत्सोमेश्वरवचनप्रामाण्यात् इति सर्वं शिवम् ॥ ३९ ॥

इति श्रीकण्ठनाथपरविग्रहस्य श्रीमदभिनव–
तटाकपद्मरसाराध्यसूनुना विश्वाराध्येन[1]
विरचिता मल्हणस्तवपञ्चिका समाप्ता।
इह मोहात्प्रमादाद्वा मया चेदुक्तमन्यथा।
प्राप्तं लेखकदोषाद्वा शोध्यं तत्कृपया बुधैः॥

॥ शिवाभ्यां नमः॥

---

1 हस्तप्रतिमुखपृष्टे व्याख्याकारस्य नाम सोमवाथ इति लिखितमस्ति।

ಕನ್ನಡಾನುವಾದ

೧) ಕಾಂತಾಕೇಶದ ಪುಷ್ಪಸುಗಂಧಕ್ಕೆಳೆಸುತ ಭ್ರಮಿಸುವ ಭ್ರಮರಗಳಿಂ
ಚಿತ್ರಿತವಾಗಿಹ ಕಂಠವ ಹೊಂದಿಹ ಮಂಗಳಕರ ಗಿರಿಜಾಧವಗೆ ।
ಯಕ್ಷಸುರಾಸುರ ಕಿನ್ನರ ಸಿದ್ಧರ ಮುಕುಟಕೋಟಿಗಳ ಸ್ಪರ್ಶವನು
ಹೊಂದಿಹ ಚರಣಗಳಿಂದೊಡಗೂಡಿದ ಶಿವನಿಗೆ ವಂದನೆ ವಂದ್ಯನಿಗೆ ॥

೨) ಎಲೈ ಶಿವನೇ, ಬ್ರಹ್ಮ, ವಿಷ್ಣುಗಳ ಮಾತುಗಳಿಗೂ ನೀನು ಗೋಚರಿಸು-ವದಿಲ್ಲ. ಹೀಗಿರಲು ನನ್ನಂಥವನ ಮಾತುಗಳಿಗೆ ಎಂದಾದರೂ ಗೋಚರಿಸ ಬಲ್ಲೆಯಾ? ಆಹಾ! ಅದೆಲ್ಲವನ್ನೂ ತಿಳಿದಿದ್ದೇನೆ. ಆದಾಗ್ಯೂ ಎಲೈ ದೇವನೇ. ನಿನ್ನ ಸ್ತುತಿಗೈಯಲು ಭಕ್ತಿಯು ನನ್ನನ್ನು ವಾಚಾಲನನ್ನಾಗಿ ಮಾಡುತ್ತಿದೆ. ನಾನೇನು ಮಾಡಲಿ?

೩) ಕಿರಣಜಾಲದಿಂದ ಚಾಮರದಂತೆ ಸುಂದರನಾಗಿರುವ ಚಂದ್ರನೇ ಚೂಡಾಮಣಿಯಾದ ಎಲೈ ಚಂದ್ರಶೇಖರನೇ,ಯಾವನು ನಿನ್ನನ್ನು ಯಥಾವಿಧಿ ವೇದ-ಮಂತ್ರಗಳಿಂದ ಈ ಲೋಕದಲ್ಲಿ ಪೂಜಿಸುವನೋ ಅವನು ಮಾಯೆ (ಅವಿದ್ಯೆ) ಯಿಂದಾದ ಪ್ರಪಂಚಸಮೂಹವನ್ನುಲ್ಲಂಘಿಸಿ ಮನೋಹರವಾದ ವಿಮಾನಗಳಿಂದ ಶಿವಪುರ (ಕೈಲಾಸ)ಕ್ಕೆ ತೆರಳುವನು.

೪) ಹೇ ಭಗವಂತಾ, ಭೂಮಿ, ವಾಯು, ಯಜಮಾನ (ಆತ್ಮ) ಜಲ. ಸೂರ್ಯ, ಚಂದ್ರ, ಆಕಾಶ ಎಂಬ ನಿನ್ನ (ಅಷ್ಟ) ಶರೀರಗಳಿಂದ ಇಡೀ ವಿಶ್ವವೇ ವ್ಯಾಪಿಸಲ್ಪಟ್ಟಿರುವದನ್ನು ನೋಡಿ ಯಾವ ವಿದ್ವಾಂಸನು ನಿನ್ನಲ್ಲಿ ಪಕ್ಷಪಾತ (ಅತಿ ಶಯ ಭಕ್ತಿ) ವನ್ನು ಇರಿಸುವದಿಲ್ಲ?

೫) ಬ್ರಹ್ಮ, ಇಂದ್ರ. ವಿಷ್ಣುಗಳಿಂದಲೂ. ದೇವದಾನವರಿಂದಲೂ, ಉಳಿದ ಸಿದ್ಧ ಮುನಿಗಳಿಂದಲೂ ಸದಾ ಪೂಜಿತನಾಗಿರುವ ನಿನ್ನನ್ನು ತಿಳಿದೂ ತಿಳಿದೂ ಬೇರೆ (ಕ್ಷುಲ್ಲಕ) ದೇವತೆಯನ್ನು ಬಯಸುವದಾದರೆ ಆ ಮೋಹ (ಮೌಢ್ಯ) ಸಂಸಾರಿ-ಗಳಿಗೆ ನರಕಕ್ಕೆ ಕಾರಣವಲ್ಲದೆ ಮತ್ತೇನು ?

೬) ಶಿವನೇ, ನೀನು ನಿತ್ಯವೂ ಸಮಸ್ತ ಲೋಕಗಳನ್ನು ರಕ್ಷಿಸುತ್ತೀ, (ಸ್ಥಿತಿ) ಕೊಲ್ಲುತ್ತೀ (ಪ್ರಳಯ), ಶರೀರೇಂದ್ರಿಯಗಳನ್ನು ದಯಪಾಲಿಸುತ್ತೀ (ಸೃಷ್ಟಿ), ತಿರಸ್ಕರಿಸುತ್ತೀ (ತಿರೋಧಾನ) ಹಾಗೂ ಪರಮ ಮುಕ್ತಿಯನ್ನು ದಯಪಾಲಿಸುತ್ತೀ (ಮೋಕ್ಷ). ನೀನು ಸರ್ವಪ್ರದನೂ, ಸರ್ವಕರ್ತನೂ ಆಗಿರುತ್ತೀ. ಯಾವ ವಿಕಲ್ಪವಿಲ್ಲದೆ ನಿನ್ನನ್ನು ತಿಳಿದ ಜಂತು (ಮನುಷ್ಯ) ನಿರ್ಲಿಪ್ತನಾಗಿ ಮೋಕ್ಷ ಪಡೆಯುತ್ತಾನೆ.

೭) ಹೇ ಶಂಭೋ, ಅನಂತ ಶಕ್ತಿಯಿಂದ ಕೂಡಿದವನೂ, ಭಗವಂತನೂ, ಭವರಹಿತನೂ ಆದ ನಿನ್ನನ್ನು ಯಾವ ಸಂಸಾರಿಗಳು ಕಪಟದಿಂದಾದರೂ ನಮಸ್ಕರಿಸುತ್ತಾರೋ, ಅವರೂ ಸಹ ಅಂಧಕಾರವುಯುವೂ. ಅತಿ ಘೋರವೂ ಆದ ಯಮನ ದಂತವೆಂಬ ಯಂತ್ರದ ಅಂತರಾಳವೆಂಬ ಗುಹೆಯನ್ನು ಪುನಃ ಪ್ರವೇಶಿಸುವದಿಲ್ಲ.

೮) ಮಕರ (ಮೊಸಳೆ) ಗಳಿಂದ ಹೊಡೆಯಲ್ಪಟ್ಟ ಹಾಗೂ ಭಯಂಕರವಾದ ವಿರೋಧಿ ಮೊಸಳೆಗಳು ಚಕ್ರಕ್ರಮದಿಂದ ಆಕ್ರಮಿಸುತ್ತಿರಲು ಕಮಲಗಳನ್ನು ಅಲ್ಲೋಲ ಕಲ್ಲೋಲಗೊಳಿಸುವ ಜಲ ಸಮೂಹವುಳ್ಳ ಗಂಗಾನದಿಯು, ಅರ್ಧ(ಬಾಲ) ಚಂದ್ರ ಶೃಂಗಗಳಿಂದ ಹೊರಬೀಳುವ ಕಿರಣಗಳೆಂಬ ಕೋರಕಗಳ ಭಾಗವನ್ನು ಹೊಂದಿದ ಮತ್ತು ಬಂಗಾರದ ಶೋಭೆ (ಬಣ್ಣ) ವುಳ್ಳ ಬೇರೆ ಯಾರ ಜಡೆಯಲ್ಲಿ ವಿಮೂಢಳಾಗಿ ಭ್ರಮಿಸುವಳು?

೯) ಭಗವಂತನಾದ ಶಿವನೇ, ಉಮಾಸಹಿತನಾದ ನಿನ್ನನ್ನು ಯಾರು ಪೂಜಿಸುವರೋ, ಉನ್ನತವೂ ಪಾವನವೂ ಆದ ಕಟಿಗಳ ಹಾರಗಳೇ ಭಾರವಾಗಿರುವ ವಿದ್ಯಾಧರಿಯರ ಬಾಹುಲತಾಯುಗಳದಿಂದ ಆಲಿಂಗಿತರಾಗಿ ಆಕಾಶದಲ್ಲಿ ವಿಮಾನಗಳಲ್ಲಿ ಸಂಚರಿಸುತ್ತಾರೆ.

೧೦) ಭೇರಿ ,ಮೃದಂಗ, ದುಂದುಭಿ. ಶಂಖನಾದಗಳಿಂದಲೂ, ದೇವಾಂಗನೆಯರ ಕಲ ಕಲ ಧ್ವನಿಯಿಂದಲೂ, ಎಲ್ಲ ದಿಕ್ಕುಗಳ ಕ್ಷೋಭೆಗೂಡಿರಲು, ಭಕ್ತಿಯಿಂದ ನಿನ್ನ ಮುಖವಾದ್ಯ ಅಥವಾ ವೀಣಾವಾದನವನ್ನು ಮಾಡಿದ ಭಕ್ತರು ಸ್ವರ್ಗದ ಭವನಗಳಲ್ಲಿ ಅಪ್ಸರೆಯರೊಡಗೂಡಿ ವಿಲಾಸದಿಂದ ಕ್ರೀಡಿಸುತ್ತಾರೆ.

೧೧) ಪ್ರಸಿದ್ಧನಾದ ದೇವೇಂದ್ರ, ಸಿದ್ಧ ಸಾಧ್ಯ, ವಿದ್ಯಾಧರರೂ, ಹರಿ, ಬ್ರಹ್ಮ, ಲೋಕಪಾಲಕರೂ ಮತ್ತು ಉಳಿದ ಸಂಜ್ಞಾನಿಗಳೂ ಸರಿಯಾದ ವಿಧಿಯಿಂದ ನಿನ್ನನ್ನು ಆರಾಧಿಸಿ ಅಮರರು ಅಮರತ್ವವನ್ನು ಹೊಂದಿದರು.

೧೨) ಪಾರ್ವತೀ ಕಲ್ಯಾಣ (ಕನ್ಯಾದಾನ ಸಮಯದಲ್ಲಿ) 'ಎಲೈ ಈಶನೆ. ನಿನ್ನ ಗೋತ್ರವಾವುದು?' ಎಂದು ಹಿಮವಂತನು ಕೇಳಲಾಗಿ, ಆಕ್ಷಣ ವಿವಾಹಮಹೋತ್ಸವದಲ್ಲಿ ಮನಸ್ಸಿಗೆ ನೆನಪಾಗಿ (ಅಥವಾ ಮನಸ್ಸಿಗೆ ಚಿಂತೆಯಾಂಟಾಗಿ) ನಿನ್ನ ನಿರುತ್ತರ ಮುಖವನ್ನು ನಗುತ್ತಿರುವ ಬ್ರಹ್ಮ ಇಂದ್ರಾದಿ ಲೋಕಪಾಲರು ನೋಡಿದರು.

೧೩) ಹೇ ನೀಲಕಂಠ, ಯಾರು ನಿನ್ನ ಚರಣದ್ವಯವನ್ನು ನಮಸ್ಕರಿಸುತ್ತಾರೆಯೋ ಅವರು ಭ್ರಮರಗೀತಗಳ ಆಡಂಬರಗಳಂತೆ ವಿರಾಜಿಸುವ ಜಲದಿಂದ ಆಕುಲವಾದ ಕೈಲಾಸ ಮತ್ತು ಮೇರುಗಿರಿಗಳ ಗಹ್ವರಗಳ ಪ್ರವಾಹಗಳಲ್ಲಿ ದೇವತಾಸ್ತ್ರೀ ಹಾಗೂ ಸಿದ್ಧಿಯುವತಿಯರ ಸಮೂಹಗಳನ್ನು ಪಡೆದು ಸುಖಿಸುವರು.

೧೪) ಹೇ ಚಂದ್ರಮೌಳಿಯೇ, ಮತ್ತೆ ಕೆಲವರು ಪದ್ಮಮಕರಂದದಿಂದ ಆಕರ್ಷಿತವಾದ ಭ್ರಮರಸಮೂಹಗಳಿಂದ ಕೂಡಿದ ಮಂದಾರ, ಕಮಲಪುಷ್ಪಗಳ ದಳಗಳ ಮಾಲೆಗಳಿಂದ ನಿನ್ನ ಪೂಜೆಯನ್ನು ಪೂರೈಸಿ. ಎಲೈ ದೇವನೇ. ದೇವೇಂದ್ರನ ಸ್ವರ್ಗದಲ್ಲಿ ಶ್ರೇಷ್ಠವಾದ ಮಂದಿರದಲ್ಲಿ (ದೇವ) ಸುಂದರಿಯರ ಜೊತೆ ವಿಲಾಸಗೈಯುತ್ತಾರೆ.

೧೫) ಹೇ ಹರನೆ, (ಪರಮ ಧಾರ್ಮಿಕ ಶಿವಭಕ್ತ) ಶ್ವೇತನನ್ನು (ಪಾಶದಿಂದ) ಎಳೆದೊಯ್ಯುತ್ತಿರುವ ಅತಿ ಘೋರನೂ ಕೋರೆ ಹಲ್ಲುಗಳಿಂದ ಕೂಡಿ ಭಯಂಕರನೂ ಆಗಿರುವ ಯಮನನ್ನು ನಿರಂತರವಾಗಿ ಗರ್ಜಿಸುತ್ತಿರುವ ಪ್ರಚಂಡ ಮೇಘಗಳ ಗುಂಪುಗಳ ಸಂಘರ್ಷದಿಂದ ಉಂಟಾದ ಧ್ವನಿಯಂತೆ ಭಯಂಕರವಾದ ಶಬ್ದದಿಂದ ಕೂಡಿದ ಹುಂಕಾರದಿಂದ ನಿನ್ನನ್ನುಳಿದು ಬೇರೆ ಯಾರು ಸುಟ್ಟು ಬೂದಿ ಮಾಡಿದರು.?

೧೬) ಎಲೈ ಶಂಭುವೇ, ಯಾರು ಹೊಟ್ಟೆಹೊರೆದುಕೊಳ್ಳಲು, ಭಸ್ಮ ಜಟೆ ಹಾಗೂ ಅಸ್ಥಿ ಮಾಲೆಗಳನ್ನು ಧರಿಸುವರೊ, ಆ ಮಾಯಾವಿಗಳೂ (ಡಾಂಭಿಕರೂ) ಸಹ ಕರ್ನಾಟ ಲಾಟ ದೇಶದ ಭಟರ ಸುವರ್ಣ ಕಿರೀಟಕೋಟಿಗಳ ಸಂಘರ್ಷದಿಂದ ಕೂಡಿದ ಚರಣಗಳುಳ್ಳ ಭೂಪಾಲರಾಗಿ ಜನಿಸುತ್ತಾರೆ. ಎನ್ನುವುದರಲ್ಲಿ ಸಂಶಯವಿಲ್ಲ.

೧೭) ಕ್ರೀಡೆಗಳಲ್ಲಿ ಮಗ್ನರಾದ ಶಿಶುಗಳೂ ವಿವಿಧ ವನಗಳಲ್ಲಿ ದೇವತೆಗಳೂ, ಸಿದ್ಧರು ಸಮಸ್ತ ಕುಲ ಪರ್ವತಗಳ ಗುಹೆಗಳಲ್ಲಿಯೂ, ಮಲಯಮಂದರ ಗಿರಿಗಳ-ಕಂದರಗಳಲ್ಲಿ ವಿದ್ಯಾಧರರೂ ನಿನ್ನನ್ನು ಆರಾಧಿಸುತ್ತಾರೆ.

೧೮) ಹೇಶಂಕರ, ಹೇಮಪುರಗಳಿಂದ ರಮ್ಯವಾದ ಪಾತಾಳಲೋಕದಲ್ಲಿ ನಿತಂಬಭಾರದಿಂದ ಮಂದಮಂದವಾಗಿ ಸಂಚರಿಸುವ ಹಾಗೂ ಕಾಮಬಾಧೆಯಿಂದ ವಿಹ್ವಲರಾದ ನಾಗಕನ್ಯೆಯರೂ ಮತ್ತು ರಾಕ್ಷಸರಮಣಿಯರೂ ನಿನ್ನನ್ನು ನಿತ್ಯ ಆರಾಧಿಸುತ್ತಾರೆ.

೧೯) ಎಲೈಶಿವನೇ, ನೀನು ಯಾರ ಮೇಲೆ ಪ್ರಸನ್ನನಾಗುವೆಯೋ ಅವನಿಗೆ ದಿವ್ಯೌಷಧ, ರಸಾಯನ, ಧಾತುವಾದ, ಯೋಗ, ವಶೀಕರಣ ಗಾರುಡಿ, ಗುಪ್ತಧನ ತೆಗೆಯುವದು ಪಾತಾಳಗಳ ಲೋಕಗಳಿಗೆ ಹೋಗುವದು; ಖಡ್ಗದಿಂದ ಶತ್ರುಜಯ ಘಟದಿಂದ ಸಮುದ್ರ ದಾಟುವದು, ಅಂಜನದಿಂದ ತ್ರಕಾಲಜ್ಞಾನ ಮತ್ತು ಉಳಿದ ಮಂತ್ರವಾದ ಇವೆಲ್ಲ ತಾನೇ ಸಿದ್ಧಿಸುತ್ತವೆ.

೨೦) ಹೇ ಶಿವ, ಪುಣ್ಯವಂತರಾದ ಯಾರಮೇಲೆ ನೀನು ಪ್ರಸನ್ನನಾಗಿರು-ವೆಯೋ, ಅವರು ಮನ್ಮಥಬಾಣಗಳಿಂದ ಪೀಡಿತರಾದ ಪಾತಾಳಲೋಕದ ನಾಗಕನ್ಯೆ ದಾನವಸುಂದರಿಯರಿಂದ (ಸ್ವಯಂ) ಆಲಿಂಗಿಸಲ್ಪಟ್ಟು ಧ್ವಜಪಟಗಳಿಂದ ತುಂಬಿದ ಮಂದಿರಗಳಲ್ಲಿ ಮಲಗುತ್ತಾರೆ.

೨೧) ಮಹೇಶನೇ, ನಿನ್ನ ಪೂಜೆಯನ್ನು ಮಾಡಿ ನಮಸ್ಕರಿಸಿದ ಇಂದ್ರನು ಸ್ವರ್ಗದಲ್ಲಿ ವಿಚಿತ್ರವಾದ ಸುರತರಂಗಳ ಮಂಜರಿಗಳಿಂದಲೂ, ಮಂದಾಕಿನೀನದಿಯ ಸುವರ್ಣ ಕಮಲಗಳಿಂದಲೂ ಅಪ್ಸರೆಯರಿಂದಲೂ, ರಾಕ್ಷಸರಿಂದಲೂ ಮತ್ತು ದೇವತೆಗಳಿಂದಲೂ ಕೂಡಿಕೊಂಡು ಸುಖವನ್ನು ಅನುಭವಿಸುತ್ತಾನೆ.

೨೨) ಎಲೈ ಭಗವಂತನೇ, ಹೊಳೆಯುವ ಕಿರೀಟಗಳನ್ನು, ದೀರ್ಘವಾದ ಸುಂದರ ಹಾರಗಳನ್ನು, ಕೇಯೂರಗಳನ್ನು ಮತ್ತು ಕವಚಗಳನ್ನು ಧರಿಸಿದ ಗಂಧರ್ವರಮಣಿಯರು ಗಿರಿ ಗುಹೆಗಳಲ್ಲಿ ಮಧುರವಾದ ಗೀತಗಳಿಂದ ತಲೆಗೆ ಕೈ ಜೋಡಿಸಿ ನಿನ್ನನ್ನು ಸ್ತುತಿಸುತ್ತಾರೆ.

೨೩) ಶಂಭುವೇ, ತ್ರಿಕಾಲಜ್ಞಾನ, ಆಕಾಶಗಮನ, ಅಣಿಮಾದಿ ಅಷ್ಟ ಸಿದ್ಧಿಗಳು ದೂರಶ್ರವಣ, ಪ್ರಾಣನಿರ್ಗಮ ಮುಂಕ್ತಿ (ಇಷ್ಟಬಂದಂತೆ ಚಿರಕಾಲ ಜೀವಿಸುವದು) ಪರಕಾಯ ಪ್ರವೇಶ ಇವೆಲ್ಲ ನಿನ್ನ ಪ್ರಸಾದದಿಂದ ಪ್ರಾಣಿಗಳಿಗೆ ಸಿದ್ಧಿಸುತ್ತವೆ.

೨೪) ಯಾವನು ಹಗಲೂ ರಾತ್ರಿ ಶಿವಶಿವನೆಂದು, ಉತ್ಕಂಟಿತನಾಗಿ ಹರಹರನೆಂದು ಸುಮ್ಮನೇ ನುಡಿಯುತ್ತಾನೆಯೋ, ಸುರನಾಥನೇ, ಅವನು ಮೂರ್ಖನಾಗಿದ್ದರೂ ಘೋರನರಕಕ್ಕೆ ಹೆದರುವದಿಲ್ಲವೆಂದು ಸತ್ಯವನ್ನೇ ನುಡಿಯುತ್ತೇನೆ. ಇದು ಪಕ್ಷಪಾತದ ಮಾತಲ್ಲ,

೨೫) ಶ್ರುತ್ಯಾದಿ ವಿಹಿತ ಆಚಾರಹೀನನಾದರೂ, ಶಿವನೇ, ಕೇವಲ ಭಕ್ತಿಯಿಂದಾಗಿ ಕಣ್ಣಪ್ಪಾದಿ ಕಿರಾತರನ್ನು ನೀನು ಕೈಲಾಸಕ್ಕೆ ಕರೆದುಕೊಂಡುಹೋದೆ. ಪೂರ್ವಜನ್ಮಸ್ಮರಣೆ, ಅಮರತ್ವ ಅಥವಾ ಮುಂಕ್ತಿ ನಿನ್ನ ಪ್ರಸಾದದಿಂದಲೇ ಸಾಧ್ಯ.

೨೬) ಭಗವಂತನಾದ ಶಿವನೇ, ಶಂಕರನೇ, ಆದುದರಿಂದ ಮೂಢನಾದ ನಾನು ಹಿಂದೆ ಅತ್ಯಂತಭೀಕರವೂ ಅಪ್ರಮೇಯವೂ ಆದ ಯಾವ ಪಾಪವನ್ನು ಮಾಡಿದೆನೋ, ಈ ಮಾಡುತ್ತಿರುವೆನೋ (ಅವುಗಳಿಗೆ ಕಾರಣವಾದ) ಪಶುತ್ವ ತಿಮಿರವೆಂಬ ಭವ-ಪಾಶವನ್ನು ಬಲವಂತವಾಗಿ ನೀನು ಹರಿದೊಗೆ. ಆಗ ಪುನರ್ಭವವೆಲ್ಲಿದೆ ?

೨೭) ನಿನ್ನ ಪಾದಪೂಜೆಯಲ್ಲಿ ರತರಾದ ಯಾವ ಮುನಿಗಳು ಕಂದಮೂಲ, ಪರ್ಣ, ಫಲಗಳನ್ನು ಸೇವಿಸುತ್ತ ಅರಣ್ಯಗಳಲ್ಲಿ ವಾಸಿಸುತ್ತಾರೆಯೋ, ಅವರು ಮುಕ್ತಿ-ಯನ್ನು ಹೊಂದುತ್ತಾರೆ. ಅದರಲಿ, ಧನ್ಯರಾದ ಅವರು ಎಲೈ ಶಿವನೇ, ನಿನ್ನ (ಪಂಚ) ಮುಖಗಳನ್ನು ಅವಲೋಕಿಸುತ್ತಾರೆ,

೨೮) ಎಲೈ ಮಹೇಶ, ಯಾವ ಮನುಷ್ಯರು ನಿನ್ನನ್ನು ಅರ್ಚಿಸಲಿಲ್ಲವೋ, ನಿನಗೆ ನಮಿಸಲಿಲ್ಲವೋ, ನಿನ್ನನ್ನು ಸ್ತುತಿಮಾಡಲಿಲ್ಲವೋ, ಅವರಿಗೆ ಸುಂದರಿಯರ ಪೀನವೂ, ವಿಶಾಲವೂ ಆದ ಜಘನಗಳಲ್ಲಿ ಹೆಚ್ಚು ಪಾಟಲವಾದ ಬಿಂಬಾರ್ಧಗಳಲ್ಲಿ ಹೊಳೆಯುತ್ತಿರುವ ಹಾಗೂ ಪೀತವಾದ ಕಂಚದ್ವಯಗಳಲ್ಲಿ ಅದು ಎಂತು ಸುಖಿಸುವ ಭಾಗ್ಯ ದೊರೆಯುವದು ?

೨೯) ಎಲೈ ಮದನಾರಿಯೇ, ನಿನ್ನನ್ನು ಯಾರು ಸತತವಾಗಿ ಸ್ಮರಿಸುತ್ತಾ-ರೆಯೋ, ಅವರು ಅಧಿಕವಾದ ಕಾಮವೆಂಬ ಮದಿರೆಯ ಮದದಿಂದ ಚಂಚಲ (ಲೋಲ)ವಾದ ನೇತ್ರವುಳ್ಳವರಾಗಿಯೂ ರತ್ನಾವಳಿಗಳ ಝಣತ್ಕಾರದಿಂದ ಅತ್ಯಂತ ರಮ್ಯವಾದ ಗಾತ್ರವುಳ್ಳವರಾಗಿಯೂ ಇರುವ ಯಕ್ಷಲೋಕದ ವನಿತೆಯರಲ್ಲಿ ಚಿರ-ಕಾಲ ರಮಿಸುತ್ತಾರೆ.

೩೦) ಪ್ರಭುವೇ, ದೇವೇಶನೇ, ಅಂಧನಾದ, ಬಲಿಷ್ಠರಾದ ಇಂದ್ರಿಯಂಗಳೆಂಬ ಚೋರರು ವಿವೇಕವೆಂಬ ಮಹಾಧನವನ್ನು ಅಪಹರಿಸಿ ಸಂಸಾರವೆಂಬ ಗಹನವಾದ ಬಾಯಿಯಲ್ಲಿ ಬೀಳಿಸಿರುವ ನನಗೆ (ಕರುಣೆಯಿಂದ) ಕರಾವಲಂಬನವನ್ನು ಇತ್ತು ಸಲಹು.

೩೧) ಹೇ ಹರನೇ, ಮೂಢನೂ, ವಿವೇಕಶೂನ್ಯನೂ ಆದ ನಾನು ಪದೇ ಪದೇ ಕೈಯನ್ನು ಮೇಲೆತ್ತಿ ಆರ್ತನಾದ ಮಾಡುತ್ತಿರುವೆ. ನೀನು ಅದನ್ನು ಕೇಳುತ್ತಿಲ್ಲವೇ ? ಎಲೈ ದೇವನೆ, ಸಂಸಾರಸಮೂಹವೆಂಬ ಕಾಂತಾರವನ್ನು ನಾನು ಪುನಃ ಪ್ರವೇಶ ಮಾಡದಂತೆ ಆವೊಂದು ಕಾರ್ಯದಲ್ಲಿ ನನ್ನನ್ನು ನಿಯಮಿಸು.

೩೨) ಹೇ ಶಿವನೇ. ನಿನ್ನ ಶಕ್ತಿಯೇ ಮಾಯಾಪ್ರಪಂಚರಚನೆಯಲ್ಲಿ ಚತುರವೂ. ಸಮಸ್ತ ವಸ್ತು ಜಾತವನ್ನು ಭೇದಿಸಲು ಸಮರ್ಥವೂ, ಸರ್ವಕರ್ತೃವೂ. ಮನುಷ್ಯರ ಸಂಸಾರಪಾಶವನ್ನು ನಿವಾರಿಸುವದೂ, ಅಜ್ಞಾನವೆಂಬ ಅಂಧಕಾರವನ್ನು ದೂರಮಾಡುವದೂ ಆಗಿರುತ್ತದೆ.

೩೩) ಎಲೈ ಭಗವಂತನೆ, ಕಿಂಚಿತ್ ಪ್ರಕಾಶವುಳ್ಳದ್ದೂ, ಅಸ್ವತಂತ್ರವೂ ಸಮಸ್ತ ಅಶುಭಗಳಿಗೆ ಆಗರವೂ ಆದ ನನ್ನ ಸಂಸಾರಪಾಪರಾಶಿಯನ್ನು ನಿನ್ನ ಬಲ (ಶಕ್ತಿ) ಯೆಂಬ ಖಡ್ಗದಿಂದ ಭೇದಿಸಿ, ಚಿದಾನಂದಪೂರ್ಣವೂ. ನಿರ್ಮಲವೂ ಸರ್ವಜ್ಞತಾ-ಯುಕ್ತವೂ ಹಾಗೂ ಸುಖಕರವೂ ಆದ ಶಿವತ್ವವನ್ನು ನನಗೆ ಕರುಣಿಸು.

೩೪) ಅಜ್ಞನಾದ ಬಾಲನೂ ಸಹ ಸ್ಮರಣಮಾತ್ರದಿಂದಲೇ ಮೃತ್ಯುಂಜಯ-ನಾದ ನಿನ್ನ ಲಿಂಗವನ್ನು ರಚಿಸಿ ಪೂಜಿಸಿದರೆ, ಧನಧಾನ್ಯಗಳಿಂದ ಸಮೃದ್ಧವಾದ, ಕಂಟಕರಹಿತವೂ. ಉನ್ನತವೂ ಆದ ರಾಜ್ಯಕ್ಕೆ ಅವನನ್ನು ಒಡೆಯನನ್ನಾಗಿ ಮಾಡುವೆ.

೩೫) ಹೇ ಪರಮೇಶ್ವರಾ, ಯಾರು ಪಾಪಕರ್ಮಿಗಳೋ, ಗುರುದ್ರೋಹ-ಗಾಮಿಗಳೋ, ಸುವರ್ಣ ಚೋರರೋ, ಬ್ರಾಹ್ಮಣಘಾತಕರೋ, ಗೋಹಂತಕರೋ, ಕುಲಟೆಯರ ಮೇಲೆ ಕಾಮಾತುರರಾದ ಪಾತಕಿಗಳೋ, ಅವರು ನಿನ್ನ ಪಾದಕ್ಕೆ ಎರಗುವದರಿಂದ ಪಾಪವೆಲ್ಲ ತೂಳೆದು ಹೋಗಿ ಚಂದ್ರನಂತೆ ನಿರ್ಮಲವಾದ ಶುದ್ಧ ದೇಹವುಳ್ಳವರಾಗುವರು.

೩೬) ಎಲೈ ಪ್ರಭುವೇ, ಯಜ್ಞಕಾಲಗಳಲ್ಲಿ ಕಲ್ಪಿಸಿದ ವಿವಿಧ ಶಿವವ್ರತ-ಗಳನ್ನು ಯಾರು ಚೆನ್ನಾಗಿ ಆಚರಿಸುವರೋ, ಅವರು (ಕರ್ಪೂರ, ಅಗರು, ಕಸ್ತೂರಿ ಹಾಗೂ ತಕ್ಕೋಲ)ವೆಂಬ ನಾಲ್ಕು ಸುಗಂಧ ದ್ರವ್ಯಗಳಿಂದ ಹಾಗೂ ಘನ ಕುಂಕುಮದಿಂದ ಸಾಲಂಕೃತರಾದ ವಿದ್ಯಾಧರ ಸ್ತ್ರೀಯರ ಕುಚಗಳ ಮಧ್ಯದಲ್ಲಿ ವಿಲಾಸಗೈಯುತ್ತಾರೆ.

೩೭) ಆದಿನಾಥನೇ, ಕಮಲಯೋನಿಯಾದ ಬ್ರಹ್ಮದೇವನು ನಿನ್ನನ್ನು ಸದಾ ಸ್ತುತಿಸುತ್ತಲೂ(ಪಂಚ) ಮುಖಗಳಿಂದ ಸ್ವಯಂ ನೋಡುತ್ತಲೂ, ನಿನ್ನನ್ನು ತಿಳಿಯಲು ತ್ತಾನೆ. ನಾವಾದರೋ ಘನ (ದಿವ್ಯ) ಸ್ತುತಿಕರ್ಮವನ್ನು ತ್ಯಜಿಸಿದವರಾಗಿದ್ದೇವೆ. ಭಕ್ತಿಯೊಂದರಿಂದಲೇ ರಚಿತವಾದುದೇ ಈ ಸ್ತೋತ್ರವೆಂದು (ದೋಷವನ್ನು) ಎಲ್ಲಾ ಕ್ಷಮಿಸಬೇಕು.

೩೮) ಗಂಗಾ ತರಂಗಗಳ ಜಲದಿಂದ ತೊಳೆಯಲ್ಪಟ್ಟ ಜಟಾಕಲಾಶಪವುಳ್ಳವನೇ, ಕಾಮನ ಅಂಗಗಳನ್ನು ದಹಿಸಿದ್ದರಿಂದ ಉಂಟಾದ ಬಿಳಿ ಭಸ್ಮದಿಂದ ಅಲಂಕೃತವಾದ ಅಂಗವುಳ್ಳವನೇ, ಅರ್ಧಚಂದ್ರ, ತ್ರಿಶೂಲ, ನಾಗರಾಜರಿಂದ ಶೋಭಿಸುವ ಅವಯವ-ವುಳ್ಳವನೇ, ದೇವದೇವನೇ, ನಿನ್ನ ಪಾದಯುಗಳವನ್ನು ನಾನು ನಮಿಸುವೆನು.

೩೯) ಭಗವನ್ ಶಿವನೇ, ಭಗವದ್ಭಕ್ತನಾದ ಮಲ್ಲಣನೆಂಬ ನಾನು ವಸಂತತಿಲಕ ವೃತ್ತಗಳಲ್ಲಿ ಈ ಸ್ತುತಿಯನ್ನು ಮಾಡಿರುತ್ತೇನೆ. ನಾನಿಲ್ಲಿ ನುಡಿದುದು ಆಯಾಸ ಮಯವೂ ದುರುಕ್ತವೂ ಆಗಿದ್ದು, ಭಕ್ತಿಮಾತ್ರದಿಂದ ರಚಿತವೆಂಬ ಒಂದೇ ಕಾರಣ-ದಿಂದ ದೋಷವೆಲ್ಲವನ್ನು ನೀನು ಕ್ಷಮಿಸಬೇಕು.

———

ENGLISH TRANSLATION

1 My Salutation is to Lord Śiva, whose neck is variegated on account of bees howering round and round, longing for fragrant flowers in the braid of hair belonging to his beloved (Pārvatī) and whose feet have friction with crores of crowns of Gandharvas, Yakṣas, Suras and Siddhas.

2 Lord Śiva! you are beyond the reach of Speeches of Brahman and Viṣṇu. What to talk of that belonging to a person like me ! I know it very well. But my devotion (to you) makes me talkative with reference to your glorification. What I shall do ?

3 Oh Śiva ! the moon as beautiful as a cāmara on account of the cluster of beams is your crest-jewel. Those who worship you here in accordance with Vedic injunctions will cross the ocean in the form of this unreal worldly existence and reach the Kailāsa in charming aeroplanes (vimānas).

4 Oh Lord ! considering well that the whole universe is pervaded by your (eight) bodies, namely, earth, wind, sacrificer (soul) water, fire, the moon, the sun and the sky (akāśa), is there any wise man who will not have partiality for (firm devotion to) you ?

5 Lord! you are worshipped with great devotion by Brahman, Indra, Viṣṇu, gods, demons, lokapālas and other sages, who have attained eight-fold siddhis. Having taken into account this, if anybody wants to worship any other deity this ignorance will cause (dreadful) hell for that creature.

6 Śiva! you protect, kill, bestow (boons) upon all creatures, reject and lead them to final goal, ie, liberation. You give every thing (to every person), you accomplish every thing. So a creature with no mental modification (Vikāra) will have no bondage at all.

7 Śambhu, those beings in this wordly existence, who will bow down to you with unlimited (endless) power, being beyond the worldy existence, even with cunningness will not enter again the dark cave in the form of terrible jaws of Yama, the god of death.

8 Is there any deity other than you, in whose thick matted hair with golden colour and bearing the burden of buds in the form of crores of beams of the crescent moon, the Gangā with the waters where in the lotus flowers are disturbed by the terrible crocodiles moving swiftly in circles which are attacked by opponent crocodiles, roamed for a long time, not knowing what to do?

9 Lord Śiva ! those who worship you along with Pārvatī, are wandering in the sky in aeroplanes as they are embraced with pairs of creeper-like arms by Vidyādhara damsels, for whom garlands hanging on their lofty and fleshy breasts are burdensome.

10 Those, who play on wind-instruments (like flutes) before you with great devotion, will enjoy the company of nymphs in the heavenly mansions, when all the directions are full of sweet but indistinct (melodious) sounds of divine beauties, mixed with the (musical) notes of drums, mṛdangas, trumphets and conches.

11 Śambhu ! having worshipped in a proper way, the wellknown Lord of gods (Indra), siddhas, sādhyas, vidyādharas, Viṣṇu, Brahman, lokapālas and other saintly persons attain immortality.

12 Īśa! at the time of giving Pārvatī in marriage to you when the Lord of the Himālayas asked you as to which was your family (gotra), fortunate Lokapālas like Brahman and Indra were laughing when they witnessed you without any answer.

13) Nīlakaṇṭha ! those who bow to the pair of your feet will get (the Comnay of) the groups of Siddha damsels in the streams (flowing) from the caves of Kailāsa and Meru mountains which are resounding with waters, producing humming sound of bees.

14) Lord with the moon on the fore head ! by worshipping you with the garlands of Mandāra and Kunda petals, followed by the groups of bees attracted by the fragrance of lotus flowers, some others shine (enjoy) in the lofty mansions of Indra in the company of beautiful damsels.

15) Lord Hara ! who else other than you, only with 'Hum' sound, resembling the roaring sound due the friction of groups of terrific roaming clouds, could burn to ashes that Yama, the god of death, terrifyng with (cruel) jaws and carrying forcibly Śveta (one of the best devotees of Śiva)?

16) Lord Śambhu ! there is no doubt as regards the fact that even cunning persons wearing holy ashes, (bhaṣma), matted hair and garlands of bones in order to get their livelihood will become kings whose feet will have friction with thousands of golden crowns of heroic soldiers of Karnātaka and Lāta countries.

17) Lord Hara, you are always worshipped in pātāla, whieh is beautiful with golden cities, beautiful Nāga damsels and demonesses, moving slowly on account of their buxom hips and suffering from love. (rather passion.)

18) Children engaged in various sports, gods in many forests, siddhas in the interior parts of caves of Kula parvatas and vidyāras in the caves of Mandara mountain worship you with great devotion.

19) He with whom you are pleased, will get mastery over heavenly medicine,[1] chemicals,[2] dhātuvāda[3], yoga, maserism, magic, knowledge of mines of pātāla, victory with sword, crossing the ocean with a pot, seeing hidden things with añjana etc.

20) Those fortunate ones with whom you are pleased will sleep with pleasures, being embraced by beautiful demonesses of the lover-most region of pātala, who are afflcted by Kāma with his (unfailing) arrows in (beautiful) mansions which are resounding with banner-cloths.

---

1. Knowledge of creeper which makes the dead alive again.
2. Knowledge of that chemical which by its touch converts iron into gold
3. Convertion of metals into gold by means of fire etc.

21 Maheśa, by bowing down to and worshipping you, Indra in heaven is amidst (engoying) the flower-bunches of extraordinarily charming divine trees along with the golden lotus-flowers in the heavenly Gangā, the nymphs, gods, and demons.

22 With folded hands, oh Lord beautiful Gandnarva damesls wearing beautiful crowns, ganlands, necklaces and earrings, glorify you loudly with sweet words in the caves of mountains.

23 Lord Śiva, by your grace, human beings in this world will be oble to attain knowledge, pertaining to three tenses (present, past and future), capacity to roam about in the sky, eight siddhis, hearing from greater distance, death at will, liberation and entering into (other's) plysical bodies.

24 Oh Lord, it is not my partiality for you, if I say that any body, though dull, need not be afraid, of terrific hell, by uttering 'Śiva,' 'Śiva' with great excitement or 'Hara' 'Hara' without devotion.

25 Lord, though devoid of knowledge pertaining to Veda-rites, the hunters (like Kaṇṇappa) were taken to heaven by you only due to their (sincere) devotion. It is possible to have knowledge of previous births, immortality or liberation with your grace only.

26 Lord Śankara, whatever great and indescribable sins, I a dull peron, might have committed, or am still committing, please pardon for those and cut into pieces wordly bondage or darkness of an animal, so that I may not be born again.

27 Lord, it is not strange that those sages staying in the forests, engaged in the worship of your feet, eating roots, fruits, leaves and nuts will get liberation. But they alone are fortunate who can look at your (five) faces.

28 Lord Maheśa, when they have neither worshipped you nor bowed down to you, nor even glorified you, how can human beingsmale) have pleasant contact with expanding big buttocks, excesively red lips and pairs of attractively heavy breasts of beautiful women?

29 Enemy of Kāmal those who remember you constantly will permanently enjoy the company of Yakṣa damsels, with their eyes swift-moving on account of intoxication due to wine in the form of excessive lust and their limbs charming on account of gingling sounds of gem-necklaces.

30 Oh Lord of gods! be pleased to protect me by holding my hand, as I am blind and the strong cnemies namely sense-organs have robbed me off my rich wealth in the form of descretion (knowledge) and dropped me in the dark (and deep) well viz worldly existence.

31 Hara ! being ignorant and lacking descretion and raising my hands again, and again, I shout loudly and pitiably. Why donot you listen to me ? Please engage me in that deed, so that I may not enter again in the forest in the form of circle of births and deaths.

32 Your power alone is expert in the art of creating the universe, deluding, doing away with all the divisions and sub-divisions of things, accomplishing every thing, removing powerful bondades of birth and death of men and dispersing the darkness in the form of ignorance.

33 Destroy with the sword in the form of your power, the bondage of birth and death, which is unrighteous in all respects, devoid of light (or with little light). Oh Lord, please bestow upon me that Śiva-hood (Lordly Status) which is full of light (knowledge), pious, omni-scient and omni-potent.

34) Hara ! if an infant makes (and worships) your Linga of clay which is inanimate by mere memory, you will bestow upon him that vast kingdom, which is prosperous with rich harvest and other wealth and is devoid of obstacles (enemies).

35) Nīlakaṇṭha ! those who have committed various sins such as enjoying the bed with the wife of one's own preacher, theftof gold, killing Brahmin and cows, eagerness for sexual intercourse with prostitutes will have their bodies as pure as the moonlight, since their impurities are washed completely.

36) Lord, those who perform various Śiva-rites, at the time of sacrifice, will rest on the pairs of of breasts of vidyādhara damsels, which are attractive on account ef four fragrant things (namely karpūra, agaru kastūrī and takkola) and thick sindhūra.

37) Lord, Brahman is capable of understanding you, as he praises you always and look at you with his four faces. But (unfortunately) we are devoid of (unable to)sincere praise. So you please excuse all this, taking into account our sincere and firm devotion.

38) Lord of Lords with vast and thick matted hair which is washed by the Gangā with her wave-water, with limbs which are besmeared witb white and holy ashes obtained by burning Kāma, with body which is decorated with crescent moon and the lord of serpents (namely Śeṣa), I bow down to the pair of your feet.

39) Śiva, this stotra (praise) is composed by me your devotee, Malhaṇa by name in Vasanta-tilaka metre. My uttererce is labourious and artless. But please bear with it, taking into consideration my sincere devotion.

———

टिप्पण्यः

१ पुष्पसुगन्धलुब्धभ्रमरमुखरीकरणमप्पयदीक्षितविरचितकुवलयानन्दप्रथमश्लोकेऽपि दृष्टव्यम्–

अमरीकबरीभारभ्रमरीमुखरीकृतम् ।
दूरीकरोतु दुरितं गौरीचरणपङ्कजम् ॥

त्रिभिरपि करणैः शम्भोः दासत्वं कविना स्वीकृतमिति ज्ञेयम् । शिवशब्दस्यौचित्यं विवृतं नीलकण्ठदीक्षितेन स्वीयनीलकण्ठविजयचम्पूकृतौ–

शिवं ध्यायस्यन्तः सकलजगतां यच्छसि शिवं
शिवो नाम्नासि त्वं शिवतरश्चासि विदितः ।
शिवार्थी जन्तुस्तत्शिवतरमखिलभावेन भगवन् ।
भवन्तं हित्वान्यं शरणयतु कं न्याय्यशरणः ।

२ पाण्डित्यप्रदर्शनिमन्तरेणापि काव्यकरणं शक्यमिति विषये कादम्बर्युत्तरभागारम्भे कविना भूषणभट्टेनोक्तं दृष्टव्यम्–

याते दिवं पितरि तद्वचसैव सार्धं
विच्छेदमाप भुवि यस्तु कथाप्रबन्धः ।
दुःखं सतां तदसमाप्तिकृतं विलोक्य
प्रारब्ध एवहि मया न कवित्वदर्पात् ॥

अपि च शिवमहिम्नःपारं न कोऽपि गच्छतीत्यत्र शिवमहिम्नःस्तोत्रस्थः ३शतमः श्लोकोऽवलोकितव्यः

असितगिरिसमं स्यात्कज्जलं सिन्धुपात्रे
सुरतरुवरशाखा लेखनी पत्रमुर्वी ।
लिखति यदि गृहीत्वा शारदा सर्वकालं
तदपि तव गुणानामीश ! पारं न याति ॥

ब्रह्मादीनामपि वाग्वैखरी शिवस्तुतौ मूकीभवतीत्यत्र तस्यैव महिम्नः-स्तोत्रस्य द्वितीयं पद्यमुदाह्रियेते ।

महिम्नः पारं ते परमविदुषो यद्यसदृशी
स्तुतिर्ब्रह्मादीनामपि तदवसन्नास्त्वयि गिरः ॥

स्थिरभक्तियोगसुलभःशिवः इति कालिदासेन यदुक्तं विक्रमोर्वशीय-नाटकस्य नान्दीश्लोके तंदवगन्तव्यम्-अन्तर्यश्च मुमुक्षुभिर्नियमितप्राणा-दिभिर्मृग्यते स स्थाणुः स्थिरभक्तियोगसुलभो निश्रेयसायास्तु वः ॥

३ शिवार्चनफलं शिवरहस्यखण्डे दृष्टव्यम्–
सकृदेवार्चितो देवो हेलयांवा नमस्कृतः ।
कुरुते वरनारीभिः प्राप्य वैद्योधरं पदम् ।
रमयन्ति नरं स्वर्गे सुररामाः मनोरमाः ॥

४ यद्यपि अत्रादिशब्देन भगवतोऽनन्तशक्तित्वादसंख्यरूपता शक्या, तथापि 'अष्टमूर्तिः शिवा तनू' इत्युक्तिमनुसृत्य भगवतः शिव-स्याष्ट तनव एव परिकीर्तिताः कालिदासेनापि–

1 अष्टाभिर्यस्य कृत्स्नं जगदपि-तनुभिर्बिभ्रतो नाभिमानः ।
(मालविकाग्निमित्रं I–1)

2 या सृष्टिः स्तष्टुराद्या, वहति विधिहुतं या हविः, या च होत्री
ये द्वे कालं विधत्तः, श्रुतिविषयगुणा या स्थिता व्याप्य विश्वम् ।
यामाहुः सर्वबीजप्रकृतिरिति: या प्राणिनः प्राणवन्त
प्रत्यक्षाभिः प्रपन्नस्तनुभिश्वतु वस्ताभिरष्टाभिरीशः ॥
(शाकुन्तलनान्दीपद्यम्)

3 त्वमर्कस्त्वं सोमस्त्वमसि पवनस्त्वं हुतवहः
त्वमापस्त्वं व्योमस्त्वमु धरणिरात्मा त्वमिति च ।
परिच्छिन्नामेवं त्वयि परिणतां बिभ्रति गिरं

न विद्मस्तत्तत्वं वयमिह तु यत्त्वं न भवसि।।
(शिवमहिम्नः स्तोत्रं २६)

4 अष्टमूर्तीनां नामानि 'रुद्र-भव-शर्व-ईशान-पशुपति-भीम-उग्र-महादेव' इति कीर्तितानि ।

५ व्याख्यानोक्तोऽयं श्लोकः औचित्यपूर्णो भवति–

विहाय साम्बमीशानं यजन्ते देवतान्तरम् ।
ते महाण्धोरसंसारे पतन्ति परिमोहिताः ।।

शिवानन्दलहर्यपि 'शिवं हित्वाऽन्ये क्षुद्रफलदा' इति स्पष्टीकरोति–

सहस्रं वर्तन्ते जगति विबुधाःक्षुद्रफलदाः
न मन्ये स्वप्ने वा तदनुसरणं तत्कृतफलम् ।
हरिब्रह्मादीनामपि निकटभाजामसुलभं
चिरं याचे शम्भोः शिव तवाम्भोज भनम् ।।

६ अत्र शम्भोः सृष्टि–स्थिति–लय–तिरोधानानुग्रहरूपं पञ्च-कृत्यं वर्णितमस्ति । अनेकाख्या वाक्यमीदृशं राजशेखरकृतकाव्यमीमांसायाः अष्टसप्ततितमे पृष्टेऽपि दृष्टव्यम्–

त्वं पासि हंसि तनुषे मनुषे बिभर्षि
विभ्राजसे सृजसि संहरसे विरौषि ।
आस्से निरस्यसि सरस्यसि रासि लाकासि
संक्रीडसे ब्रुडसि मेधसि मोदसे च ।।

७ अज्ञानतोऽपि वा कृतं शिवनामोच्चारणं मुक्तिप्रदं भवतीत्यत्र पाशुपतोक्तिः प्रमाणम्–

नामानि ये महेशस्य गृणन्त्यज्ञानतोऽपि वा ।
तेषामपि शिवो मुक्तिं ददाति किमतः परम् ।।

व्याख्यानोदाहृतमपि पद्यमवलोकयितव्यम्-
अनादरेण शाठ्येन परिहासेन मायया।
नमस्कारे कृते लिङ्गे सर्वपापहरो हरः॥

८ गङ्गाप्रवाहधारणे शिव एव शक्त इति विषये महिम्नःस्तोत्रस्य सप्तदशपद्यं दृष्टव्यम्-

वियद्व्यापीतारागणगुणितफेनोद्गमरुचिः
प्रवाहो वारां सः पृषतलघुदृष्टः शिरसि ते।
जगद्द्वीपाकारं जलधिवलयं तेन कृतमि-
त्यनेनैवोन्नेयं धृतमहिम दिव्य तव वपुः॥

९ शिवपरिचर्याफलं पद्मपुराणोक्तं-
स्वर्गस्य मार्गाः बहवो प्रविष्टाः
ते यत्नसाध्या कुटिलाश्च विघ्नाः।
निमेषमात्रेण सदाफलं तु
ददाति शम्भो परिचारकर्म॥

१२ परशिवस्य जगद्योनित्वादलक्ष्यजन्मता परिहासपूर्वं बटुना (तद्वेषधारिणा शिवेनैव) पार्वतीपुरतः प्रस्तुता-

वपुर्विरूपाक्षमलक्ष्यजन्मता

दिगम्बरत्वेन निवेदितं वपुः। (कुमारसम्भवे V-72)
सैव पार्वत्या सह स्वैरालापे शिवेन प्रकटिता-

क्वतिष्ठतस्ते पितरौ ममेवे-
त्यपर्णयोक्ते परिहासपूर्वम्।
क्ववा ममेव श्वशुरौ तवेति
तामीरयन् सस्मितमीश्वरोऽव्यात्॥

१३ शिवपादवन्दनफलमत्र वर्णितम् । उच्यते च-

ये नमन्ति विरूपाक्षमीशानं कृत्तिवाससम् ।

प्रसन्नचेतसो रुद्र ! ते यान्ति परमं पदम् ॥

(व्याख्यानोदाहृतम्)

१४ कुसुमपूजाफलमत्र विवृणोति । श्रीमद्भगवद्गीतायामुक्तम्-

पत्रं पुष्पं फलं तोयं यो मे भक्त्या प्रयच्छति ।

तदहं भक्त्युपहृतमश्नामि प्रयतात्मनः ॥ (गीता. IX-26)

अपिच किञ्चिद्दलं वा चुलुकोदकं वा देवेन्द्रलक्ष्मीं ददते ददासि ॥ (व्याख्यानोदाहृतम्) पुरुषार्थसुधानिधौ १९५ तमे पृष्टेऽप्युक्तम्-

चुलुकोदकमात्रेण ह्यभिषिक्तः शिवो यथा ।

संतुस्येन्न तथा दानाज्जपहोमार्चनादिभिः ॥

१५ भक्तवात्सल्यं शिवस्य चात्र प्रकटीकृतं श्वेतोदाहरणेन। स्कान्दे दुर्वाससा जैमिनिं प्रति यदुक्तं तदत्रोदाहर्तव्यम्-

गर्जन्मेघरवोदग्रहुंकृतेन स तत्क्षणात् ।

चक्रे भस्मावशेषाङ्गं कालं काममिवोद्यतम् ॥

१६ दाम्भिकानामपि शिववेषधारणं फलप्रदं यदि, शिवभक्तानां किं वक्तव्यम् ? इयै च पुराणोक्तिः-

येऽपि दम्भं समाश्रित्य

भक्ताः मद्रूपजीविका ।

संसारार्थे विमुच्यन्ते

किं पुनर्मत्पराः जनाः ॥

१९ सिध्द्यर्थमपि शिव एव पूजनीय इत्यर्थे कविनेदमुक्तम्। उक्तं चान्यत्र-

तस्मात्संपूजयेल्लिङ्गं
यदीच्छेत्सिध्दिमात्मनः।

२३ ऐश्वर्यमष्टगुणितम्- अणिमाद्यष्टसिध्दयः।

२४ यदृच्छया कृतं शिवनामकीर्तनं सर्वपापहरमित्यत्र दृष्टव्यादित्यपुराणोक्तिः-

प्रसंगात्कौतुकाल्लोभाद्भयादज्ञानतोऽपि वा।
हर इत्युच्चरन्मर्त्यः सर्वपापैः प्रमुच्यते॥

२७ शम्भुमुखालोकनेन या तुष्टिर्धन्यता वा भवति तादृशां वनवातानां रामगात्रस्पर्शसुखिनां प्रतिमानाटके वर्णिता

धन्याःखलु वने वाता
कल्हारा सुखशीतला।
राममिन्दीवरश्यामं
ये स्पृशन्त्यनिवारिताः॥

२८ एतादृशं पद्यमेकं कुवलयानन्दोदाहृतं स्मर्तव्यम्-

अकृशं कुचयोः कृशं विलग्ने
विपुलं चक्षुषि विसृतं नितम्बे।
अधरेरुणमाविरस्तु चित्ते
करुणाशालि कपालिभागधेयम्॥

तदिदमत्र तात्पर्यम्-
यद्द्वारे मत्तमातङ्गा
वायुवेगास्तुरङ्गमाः।

पूर्णेन्दुवदना नार्यः
शिवपूजाविधेः फलम् ॥

३० पापिनां दुर्धियां लोके शिव एव हि तारकः। इत्यत्र स्तुति-कुसुमाञ्जलिपद्यमेकमवलोकयिव्यम्–

स्वैरेव यद्यपि गतोऽहमधः कुकृत्यैः
तत्रापि नाथ तव नास्म्यवलेपपात्रम् ।
दृप्तः पशुः पतति यः स्वयमन्धकूपे
नोपेक्षते तमपि कारुणिको हि लोकः ॥

३४ पांसुमयलिङ्गार्चनफलमत्रोक्तम्। अस्मिन् सदर्भे सौर-संहितापद्यमेकं दृश्यम्–

पांसुना क्रीडमानोऽपि
लिङ्गं कृत्वा स वै नरः।
प्रेत्यान्ते लभते राज्यं
सुसंपन्नमकण्टकम् ॥

३५ एतान्येव पापकर्माणि कुर्वतामपि मनुजानां गङ्गातीरे तनुत्यजां स्वर्गप्राप्तिर्भवतीत्यत्र गङ्गालहरीपद्यमेकं प्रमाणम्–

अपि घ्नन्तो विप्रान् अविरतमुषन्तो गुरुसतीः
पिबन्तो मैरेयं पुनरपि हरन्तश्च कनकम् ।
विहाय त्यज्यन्ते तनुमतनुदानाध्वरजुषां
उपर्यम्ब ! क्रीडन्त्यखिलसुरसम्भावितपदाः ॥ (34)

३८ वर्णविन्यासवक्रताया उदाहरणपद्यमिदं गङ्गालहरीपद्ये-नैकेन सदृशम्–

विभूषितानङ्गरिपूत्तमाङ्गा ।
सद्यः कृतानेकजनार्तिभङ्गा ।।

मनोहरोत्तुङ्गचलत्तरङ्गा ।
गङ्गा ममाङ्गान्यमलीकरोतु ।। (52)

३९ भक्त्या कृता शिवनुतिः परिपूजनीया दुष्टाऽपि तत्प्रणयिनी भवतीति सूक्तम् । षडक्षरदेवकविना कविकर्णरसायने सुष्टु भणितम्–

वाग्वृत्तिरल्पापि महेश्वराङ्घ्रि–
समर्पिता श्लाघ्यतमैव मूर्ध्ना ।

बुधैः कवेरकंतरुप्रसून–
मालेव शम्भोश्चरणे प्रणीता ।। (I-51)

इत्थं शिवयोगदीपिकोक्तरीत्या शिवप्रीतिकरीं पञ्चधा करिचर्यां-कुर्वाणो पारलौकिमैहिकं च सुखं प्राप्य मोदते । तत्रोक्तम्–

ज्ञानं शिवमयं भक्तिः
शैवी ध्यानं शिवात्मकम् ।

शिवव्रतं शिवार्चेति
शिवयोगो हि पञ्चधा ।। (I-15)

———

अनुबन्धः

विश्वाराध्येन स्वीयटीकारम्भे निरूपितं कविजीवितम्

इयमिह कथासङ्गतिः- पुराकिल काश्मीरदेशे भारतीपीठपत्तने सुवर्णभट्टारकनामा शिवद्विज उवास। तस्मिन् मल्हणो नामा शिवगणोजज्ञे। सः प्राप्तशिवदीक्षोऽधीताखिलवेदः पठिताशेषशास्त्रः परिचितसकलकलो विरचितशिवशरणशुश्रूषः पितुः प्रीतिं व्यातेने। ततः पिता सूनौ यूनि तस्मादेकैकदिनस्यैककसहस्रसख्यया शतायुःपर्यन्तमनायासेन भोक्तुं वित्त-राशिं स्थापयित्वा शिवनियोगादूर्ध्वलोकं जगाम। मल्हणस्तु शिवाचार-सम्पत्त्या वर्तमानः कदाचित् विजयेश्वरलिङ्गाख्यालयमाविवेश। तदा मल्हणीतिकाचन गणिका तमीश्वरमुपासितुम् आययौ। तस्या रूपं लावण्यं यौवनाद्भुदं विलासं चातुर्यं आलोकमाणोऽतिविस्मितो मदन-बाणविद्धहृदयस्सन् जीवितलाभाय तामेव शिश्रिये। सापि तं तथैव शिश्रिये। अथ तादृशं वित्तराशिमावत्सरत्रयात्तस्यै दिदेश। ततस्तं क्षीणवित्तं वीक्ष्य वृद्धवेश्या मल्हणं निष्कास्य धनिकान्तरं तु सुतया सह सङ्गमयाञ्चकार। स तु निष्कासितोऽपि मल्हणो मल्हणीं ध्यात्वा विरह-वेदनामसहमानो विवेकमवधीर्य रजन्यामेवागत्य मल्हणीवासगृहवलीक-भित्तिमालम्ब्य तदीयवचसामाकर्णनेन प्राणान्भर्तुं गुप्तस्तस्थौ। मल्हणी तु मल्हणे मनो निवेश्य मातृभीत्या धनिकाय तनुं दत्वा यथाकथञ्चित् ईषत्कालं शयित्वा शयनादुत्थाय बहिरवलोक्य शिवशक्तिपातादगुरुमिव अन्धतमसि सौदामनीसहायतः प्राणेश्वरं निरीक्ष्य सपदि समीपमेत्य सत्कृत्य सदनान्तरे स्थापयित्वा धनिकं क्रमेण निष्कास्य प्रातः प्राणेश्वरेण सार्धं शिवालयमागम्य विजयेश्वरं स्तुत्वा मां वृणीष्वेति बोधयामास। ततो मल्हणः शिवे मनोनैश्चल्यायतया पश्चादाश्चिष्टः स्तोत्रमिदं कृत्वा शङ्करं प्रत्यक्षीचकार। तुष्टश्च पार्वतीपतिः मल्हणाय मल्हण्यैच गणत्वं दत्वा मल्हणं मल्हणीं तन्मातरं तत्परिपोष्यमाणं शुकं च शिवलोकं निनायेति।

श्लोकानुक्रमणिका

अन्धस्य मे	३०
अन्येऽरविन्द	१४
उक्तं शिवेति	२४
उर्वीसमीर	४
कस्यापरस्य	८
कान्ताकच	१
क्रीडाप्रपञ्च	१७
गङ्गातरङ्ग	३८
गर्जत्प्रचण्ड	१५
गौरीप्रदान	१२
चर्याविबोध	२५
छित्त्वा समस्त	३३
झङ्कारडम्बर	१३
तस्मात्करोमि	२६
त्वं पासि हंसि	६
त्वत्पादपूजन	२७
त्वां दीप्यमान	२२
दिव्यौषधी	१९
न ब्रह्मविष्णु	२
पातालताल	२०
प्रोत्तुङ्गपीवर	९
प्रोद्दामकाम	२९
बालोऽपि संस्मरण	३४
ब्रह्मेन्द्रविष्णु	५
भेरीमृदङ्ग	१०
मायाप्रपञ्च	३२
मूढो विवेक	३१
यत्पद्यते	३७
ये जीवनाय	१६
ये त्वां मरीचि	३
ये त्वां विभो	३६
ये पापकर्म	३५
शम्भो प्रसिद्ध	११
शाठ्येन येऽपि	७
स्तोत्रं मया	३९
स्फीते प्रथिम्नि	२८
स्वर्गे विचित्र	२१
हे देव हेम	१८
ज्ञानं त्रिकाल	२३

———

शुद्धिपत्रम् §

पृष्टसंख्या	पङ्क्तिसंख्या	अशुध्द	शुध्द
२	२७	काव्याख्यारेण	व्याख्याकारेण
२	२८	टृषव्या	दृष्टव्या
६	५	भगवस्त्वयि	भगवंस्त्वयि
९	२	यष्ट्वा	यद्वा
९	१५	शाक्ति	शक्ति
२४	२०	नीतास्स्वया	नीतास्त्वया
२८	४	यद्वारे	यद्द्वारे
२८	८	वनिनासु चिरं	वनिताःसुचिरं
३२	४	जगद्वन्धुरु	जगद्वन्धुर्गुरु
३२	२१	शक्तिस्य	शक्तिस्तस्य
३८	१६	सोमवाथ	सोमनाथ
४	०६	ತ್ರಕಾಲ	ತ್ರಿಕಾಲ
६	४	ಈ	ಈಗ
७	७	(ಪಂಚ)	(ನಾಲ್ಕು)
७	०२	ಕಲಾಶಪ	ಕಲಾಪ
७	०६	ಮಂಲ್ಜಣ	ಮಂಲ್ಹಣ
4	3	Comnay	Company
5	13	Maserism	Masmerism

---

§ स्फुटानामेव दोषाणामुल्लेखोऽत्र कृतः क्रमात् ।

मुरुसाविरमठीय – श्रीमद्जगद्गुरु – गङ्गाधरधर्मप्रचारक मण्डलद्वारा प्रकाशिताः संस्कृतग्रन्थाः :–

१ वीरशैवानन्दचन्द्रिका

२ विशेषार्थप्रकाशिका

३ तन्त्रसंग्रहः

४ शिवमन्त्रजपविधिः

५ संस्कृतप्रवेशः

६ संस्कृतव्याकरणदर्पणः

७ संस्कृतमार्गदर्शः

८ वीरशैवसदाचारसंग्रहः

९ श्रीमत्कुमारगीता

१० हानगल्ल–श्रीकुमारस्वामिनः जीवनचरितम्

११ शिवाद्यष्टकस्तोत्रमणिमाला

१२ करडीशचरितामृतचम्पूप्रबन्धः

१३ मल्हणस्तोत्रम्

१४ प्रभुदेववचनम् (यन्त्रस्थम्)